अनेकभेदविषययुतं ज्योतिषशास्त्रं हि सर्वशास्त्रोपकारकमिति लोककथा श्रूयते। वेदाङ्गरूपं हि ज्योतिषशास्त्रं सर्वशास्त्रेषु प्राधान्यतममिति सर्वे विपश्चिता एकमनाः स्वीकुर्वन्ति तत्र च ज्योतिष-शास्त्रमनेकभेदविषययुतमिति प्रतिपादयन् संहिताहोरासिद्धान्तरूपे स्कन्धत्रयात्मके च वराहः ब्रवीति। अन्य आचार्यः नारदोऽपि ज्योतिषस्य अनेके भेदाः स्वीकृतवान्। तत्र हि नैकानि तथ्यानि निगूढरूपाणि लोकोपकारिणी सन्ति येषां सम्यगध्ययनेन जनानां महदुपकारो भवेदिति तेष्वेव विषयेषु संहिताविज्ञानमपि अतीव प्रधानतमं वरीवर्ति विज्ञानजन्यं संहितोक्तं सर्वे विषयाः स्वतन्त्रविज्ञानानि सन्ति परं तावदस्य यथार्थनिरूपणं न कर्त्तुं शक्यते यावत् विविधप्रभावाणां विशिष्टतया ज्ञानं न प्राप्यते। संहिताशास्त्रस्य विविधाः प्रभावाः भूर्भुवस्वर्लोकादिषु प्रतिक्षणमेवजायन्ते। तेषु लोकेषु भौगोलिको प्रभावः तु जनानामुपरि नित्यं प्रभवत्येव। लौकिकप्रभावविषयेषु वास्तुजन्यप्रभावानुगुण्यं तु तदपि श्रेयस्करं भवति यतो हि वास्तुनो एव जनाः नित्यं प्रभाविताः भवन्ति न तु केवलं जना एव अपितु स्थलचरजलचरनभचरादयः प्राणिनः अपि वास्तुन प्रभाविताः भवन्ति। वास्तुनि समागतविविधेषु विषयेषु मुख्यं भवति गणितागतप्रकारनिरूपकं गणितं हि वास्तुनः आधारमूर्तिः यतो हि शुभभूम्यादिचयनानन्तरं पिण्ड-आय-नक्षर-वार-अंश-ऋण-द्रव्यादीनां साधनं तु तद्गृहस्य गृहकर्तुश्च कृते शुभाशुभनिदर्शकं भवति। यदा निवासयोग्यं भूखण्डस्य चयनं भवति तदा तस्मिन् भूखण्डे वासाय सर्वादौ पिण्डानयनस्य विचारः साध्यते। पिण्डो हि गृहस्य आदिसाधकः भवति। पिण्डोपरि एव गृहस्य आयादीनां साधनं क्रियते। तत्र पिण्डो नाम किमिति जिज्ञासायाः निरसनार्थमुच्यते यत् पिण्डो हि चयनितस्य भूखण्डस्य वासार्थं गृहनिर्माणार्थं च क्षेत्रफलज्ञानपरकमिति अतः निवासार्थं गृहस्य यत् क्षेत्रफलं भवति तदेव पिण्ड इति कथ्यते। अत्र पिण्डो कश्चन भिन्नो भवति यतो हि गृहार्थं यस्य भूखण्डस्य चयनं क्रियते तत्तु सम्पूर्णमेव गृहक्षेत्रफलं भवति किन्तु सर्वेषु खण्डेषु गृहनिर्माणं न क्रियते यावति भूखण्डे गृहनिर्माणं क्रियते तावदेव क्षेत्रफलं पिण्ड इति कथ्यते अतः निवासार्थमेव गृहनिर्माणार्थं चयनिता भूरेव पिण्ड इत्युच्यते वासयोग्यभूमिः covered areaतथा सम्पूर्णा भूमिः boundary area द्विधा भवति। अतः वासयोग्या भूमिः पिण्ड इत्युच्यते।

वास्तुनि मुख्यतः आकाररूपेण १८ गृहाणि भवन्ति तेषु वर्ग-आयत-वृत्त-मूसल-शकट-सूप- मृदङ्ग-अर्धवृत्त-नतोन्नत-परशु-त्रिकोण-चक्र-धनुष-सन्दंशिका-दण्ड-हस्तव्यजन-गदा-विषमाकृति-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

रूपाणि अष्टादशगृहाणि आकृतिरूपाणि भवन्ति फलसहितं तदुक्तं पद्यमस्ति -

आयते सर्वसिद्धिः स्यात् चतुरस्रे धनागमः
वृत्ते तु बुद्धिवृद्धिः स्यात् भद्रं भद्रासने भवेत्।

चक्रे दारिद्र्यमित्याहुर्विषमे शोकलक्षणम्

राजभीतिस्त्रिकोणे स्याच्छकटे तु धनक्षयः।

दण्डे पशुक्षयं प्राहुः शूर्पे वासे गवां क्षयः
गोव्याघ्रबन्धने पीडा धनुः क्षेत्रे भयं महत्।[1]

भूखण्डचयनानन्तरं कीदृशं गृहस्वरूपं स्यादिति पूर्वमेव विचारयन् ततः तदनुरूपमेव पिण्डानयनं विधातव्यमिति। प्रायः गृहनिर्माणार्थम् आयत-वर्ग-आकृती श्रेष्ठे भवतः यतो हि एतदाभ्यन्तरे शालाकक्षनिमार्णार्थं चतुर्दिशः समभूरेव प्राप्नोति। अतः पिण्डानयनमपि आयत-वर्ग-आकृतिरूपगृहाय श्रेष्ठं जायते। चयनितस्य भूखण्डानुरूपमेव पिण्डसाधनं क्रियते। यत् पिण्डफलमायाति तस्मिन् एव गृहनिर्माणं कर्त्तव्यमिति पिण्डसाधनार्थं मुख्यत्वेन इष्टायनक्षत्रयोः साधनं चयनं वा पूर्वत एव करणीयं भवति यथा विवाहादौ कूटादिकं चिन्त्यं भवति तथैव गृहकर्तुः येन नक्षत्रेण सह उचितं गुणसाम्यं भजते तेनैव नक्षत्रेण सह मेलकं कुर्यात् यथा नृणां जन्मपत्रनिर्माणं क्रियते तथैव पिण्डोपरि गृहाणां जन्मपत्रनिर्माणं तस्य शुभाशुभत्वं च निर्धारणं क्रियते। यन्नक्षत्रं सर्वाधिकं शुभगुणयुतं प्रदिशेत् तदेव इष्टनक्षत्रं कल्पयित्वा अथवा नवषु निर्दिष्टेषु उत्तमं नक्षत्रं चित्वा पिण्डानयनं कार्यम्। एवमेव ध्वजादिषु आयेषु एकं विषमायं चित्वा तस्मादपि सूत्रानुसारं पिण्डानयनं विधातव्यमिति अतः अयं पिण्डः इष्टायनक्षत्रभवो भवति। अत्र वास्तुनिगृहकर्तुः नामराशेः नामनक्षत्रस्य च प्राधान्यं भवति। गृहकर्तुः नामनक्षत्रमपि इष्टनक्षत्रेण सह मेलकाय भवति अन्यत्र पिण्डसाधने तस्य नौचित्यम् आदौ इष्टनक्षत्रनामानि –

त्रिभिस्त्रिभिर्वास्तुनि कृत्तिकात उद्वेगपुत्राप्तिधनाप्तिशोकः
शत्रोर्भयं राजभयं विनाशः सुखं प्रवासश्च नव प्रभेदाः।[2]

आर्द्रा, पुनर्वसुः, पुष्यः, आश्लेषा, मघा, पूर्वाफाल्गुनी शतभिषा, पूर्वाभाद्रपदा, उत्तराभाद्रपदा च एतानि नव नक्षत्राणि प्रशस्तानि भवन्ति गृहपिण्डानयने एतेषु एव एकं चित्वा पिण्डसाधनं विधेयं पुनः अष्टौ आयाः भवन्ति एतेषु अपि विषमसंख्यकमायं चित्वा पिण्डसाधनं विधेयं तत्र अष्टानां आयानां नामानि –

---

1. बृहद्वास्तुमाला, भूमेर्जीवितादिज्ञानम्, 90–92 श्लोकाः।
2. बृहद्वास्तुमाला, ग्रहमैत्रीविचारः, 3 श्लोक।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ध्वजो धूमः हरिः श्वागौः खरेभौ वायसोष्टमः

पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिः।[३]

एतद्वयसाधनात्परमेव पिण्डानयनं कर्तव्यमिति पिण्डानयनाय विविधानामाचार्याणां पृथक् पृथक् मतानि सन्ति। तत्र पिण्डानयनार्थं रामदैवज्ञद्वारा प्रदत्तं सूत्रं वर्तते यत् स्वेच्छया कल्पितस्य इष्टनक्षत्रस्य संख्यायामेकः शोधनीयः ततश्च एकन्यूनेन इष्टनक्षत्रेण सह द्विपंचाशदधिकैकशतसंख्यया १५२ गुणनं कार्यं एतद् हि इष्टनक्षत्रजन्यं गुणनफलं भवति पुनश्च अन्यत्र स्वकल्पितस्य इष्टस्य आयस्य संख्यायामेकः अपि शोधनीयः ततश्च एकन्यूनेन इष्टायेन एकाशीति ८१ संख्यया गुणनं करणीयम् एतद् हि इष्टायजन्यं गुणनफलं भवति। तदनन्तरम् इष्टनक्षत्रजन्यं गुणनफलं, इष्टायजन्यं गुणनफलं च एकत्र योजनीयम्। पुनः तस्मिन् योगफले सप्तदश १७ संख्यया अपि योजनीया। पुनश्च तद्योगे षोडशाधिकद्विशतेन २१६संख्यया भागहारं कुर्यात्। भागहारे कृते सति यच्छषफलम् अवशिष्टं भवति तदेव तस्य गृहस्य पिण्डमानं क्षेत्रफलमानं वा भवति अत्र लब्धिः तु त्याज्य एव भवति यथोक्तम्–

एकोनिष्टर्क्षहता द्वितिथ्यो रुपोनितेष्टायहतेन्दुनागैः

युक्ता घनैश्चापि युता विभक्ता भूपाश्विभिः शेषमितो हि पिण्डः।[४]

एतस्य च स्वरुपमेवमेव कल्पते –

कल्पिता इष्टनक्षत्रसंख्या – 1 = एकोनिता इष्टनक्षत्रसंख्या।
एकोनिता इष्टनक्षत्रसंख्या x 152 = प्रथमं गुणनफलम्।
कल्पिता इष्टा आयसंख्या – 1 = एकोनिता इष्टायसंख्या।
एकोनिता इष्टासंख्या x 81 = द्वितीयं गुणनफलम्।
प्रथमं गुणनफलम् + द्वितीयं गुणनफलम् = योगफलम्।
योगफलं + 17 = सम्पूर्णं योगफलम्।
सम्पूर्णं योगफलम् ÷ 216 भागफलम्, अवशिष्टं शेषफलम् च।
अत्र आगतं भागफलं तु त्याज्यमेव अस्ति।
प्राप्तं शेषफलम् एव गृहस्य पिण्डमानं क्षेत्रफलं वा भवति।

एतस्य च साधनक्रमः उदाहरणरुपेण प्रस्तूयते अत्र–

निवासकर्तुः नाम = परमेश्वरदयालः
कल्पितम् इष्टनक्षत्रम् = आर्द्रा (षष्ठसंख्याकम्)
कल्पनया इष्टायः = ध्वजः (प्रथमः आयः)।

---

3. मुहूर्त्तचिन्तामणिः, पीयूषधारा, वास्तुप्रकणम्, 5 श्लोकः।
4. मुहूर्त्तचिन्तामणिः, वास्तुप्रकरणम्, 3 श्लोकः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अतः सूत्रानुसारेण गणितकरणेन गृहपिण्डानयनम्-
कल्पिता इष्टनक्षत्रसंख्या 6-1=5 = एकोनिता इष्टनक्षत्रसंख्या।
एकोनिता इष्टनक्षत्रसंख्या 5x152=760 = प्रथमं गुणनफलम्।
कल्पिता इष्टायसंख्या 1-1=0 = एकोनिता इष्टायसंख्या।
एकोनिता इष्टायसंख्या 0x 81=0 = द्वितीयं गुणनफलम्।
प्रथमं गुणनफलं 760 + द्वितीयं गुणनफलं 0 = 760 = योगफलम्।
योगफलम् 760 + 17 = 777 = सम्पूर्णं योगफलम्।
सम्पूर्णं योगफलम् 777 ÷ 216 =

अत्र भागफलं 3 इति तु प्रयोगाभावात् त्याज्यम् अस्ति।
तथा च शेषफलम् = 129 इति गृहस्य पिण्डमानम् अस्ति।
अतोऽत्र परमेश्वरदयालस्य गृहस्य पिण्डमानं (क्षेत्रफलमानं वा) = 129 इति सिद्धं भवति।

जनाः स्वप्रकृत्याधारेण, स्वस्तरानुसारेण, स्ववर्गाधारेण वा निवासाय गृहाणां निर्माणं कारयन्ति। कदाचित् लघुगृहमेव पर्याप्तं भवति, कदाचित्तु ते महदाकारकं प्रासादं वा निर्मातुमिच्छन्ति। कदाचित् आगतपिण्डमानात् अपि बहुगुणितक्षेत्रफलस्य गृहस्य निर्माणं कोटिपतिभिः धनिकैः अत्युच्चवर्गीयजनैश्च कार्यते हि। तदानीम् अस्माभिः साधितं पिण्डमानं तु अत्यल्पमेव भवति प्रायः। अतः तस्मिन् समये तस्य अत्यल्पपरिमाणकस्य पिण्डमानस्य इच्छानुगुणं कर्तुम् अन्यविधिं वदन्ति। तत्र यदि पिण्डमानं भूखण्डमानादल्पं भवति तथा शेषपिण्डमाने 216 इति संख्यायोजनेन पिण्डप्रमाणमधिकं जायते। यदि एतदति पूर्वसाधितं 129 अस्ति। एतत् मानं चयनितभूखण्डादल्पमस्ति। अतः अस्मिन् २१६ संयोजनेन ३४५ इति क्षेत्रफलमायाति एतदपि चयनितभूखण्डादल्पमस्ति अतः पुनः अस्मिन् २१६ योजयित्वा ५६१ इति मानं प्राप्तमस्ति एतत् मानं भूखण्डासन्नमस्ति अतः एतदेव पिण्डमानं क्षेत्रफलं वेति भवति बृहद्वास्तुमालादिषु ग्रन्थेषु अनेकर्षीणां पिण्डसाधनोपयोगीनि सूत्राणि प्रतिपादितानि सन्ति। तदनुरूपमेव पिण्डसाधनं समानमेव आयाति। एवमेव यद् पिण्डमानमागतं भवति तदेवाधिकृत्य गृहाकारानुरुपमेव गृहनिर्माणं कुर्यात्। यदि वृत्ताकारं गृहं स्यात् तदा समागतपिण्डस्य मानं व्यास परिधिसम्बन्धद्वारा तदनुगुणं वृत्ताकारं कुर्यात् एवमेव प्रकारेण गणितीयविधिना त्रिकाणोर्धवृत्तवृत्तादीनां गृहाकारानुरूपं पिण्डसाधनं विधाय वास्तुशास्त्रोक्तेन नियमेन यथादिक् स्नानादिकक्षनिर्माणं कृत्वा सुखेन जीवनं यापयेदिति शम्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ध्वजो धूमः हरिः श्वागौः खरेभौ वायसोष्टमः

पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिः।[३]

एतद्वयसाधनात्परमेव पिण्डानयनं कर्तव्यमिति पिण्डानयनाय विविधानामाचार्याणां पृथक् पृथक् मतानि सन्ति। तत्र पिण्डानयनार्थं रामदैवज्ञद्वारा प्रदत्तं सूत्रं वर्तते यत् स्वेच्छया कल्पितस्य इष्टनक्षत्रस्य संख्यायामेकः शोधनीयः ततश्च एकन्यूनेन इष्टनक्षत्रेण सह द्विपंचाशदधिकैकशतसंख्यया १५२ गुणनं कार्यं एतद् हि इष्टनक्षत्रजन्यं गुणनफलं भवति पुनश्च अन्यत्र स्वकल्पितस्य इष्टस्य आयस्य संख्यायामेकः अपि शोधनीयः ततश्च एकन्यूनेन इष्टायेन एकाशीति ८१ संख्यया गुणनं करणीयम् एतद् हि इष्टायजन्यं गुणनफलं भवति। तदनन्तरम् इष्टनक्षत्रजन्यं गुणनफलं, इष्टायजन्यं गुणनफलं च एकत्र योजनीयम्। पुनः तस्मिंन् योगफले सप्तदश १७ संख्यया अपि योजनीया। पुनश्च तद्योगे षोडशाधिकद्विशतेन २१६संख्यया भागहारं कुर्यात्। भागहारे कृते सति यच्छषफलम् अवशिष्टं भवति तदेव तस्य गृहस्य पिण्डमानं क्षेत्रफलमानं वा भवति अत्र लब्धिः तु त्याज्य एव भवति यथोक्तम्–

एकोनिष्टर्क्षहता द्वितिथ्यो रुपोनितेष्टायहतेन्दुनागैः

युक्ता घनैश्चापि युता विभक्ता भूपाश्विभिः शेषमितो हि पिण्डः।[४]

एतस्य च स्वरुपमेवमेव कल्पते –

कल्पिता इष्टनक्षत्रसंख्या – 1 = एकोनिता इष्टनक्षत्रसंख्या।
एकोनिता इष्टनक्षत्रसंख्या x 152 = प्रथमं गुणनफलम्।
कल्पिता इष्टा आयसंख्या – 1 = एकोनिता इष्टायसंख्या।
एकोनिता इष्टासंख्या x 81 = द्वितीयं गुणनफलम्।
प्रथमं गुणनफलम् + द्वितीयं गुणनफलम् = योगफलम्।
योगफलं + 17 = सम्पूर्णं योगफलम्।
सम्पूर्णं योगफलम् ÷ 216 भागफलम्, अवशिष्टं शेषफलम् च।
अत्र आगतं भागफलं तु त्याज्यमेव अस्ति।
प्राप्तं शेषफलम् एव गृहस्य पिण्डमानं क्षेत्रफलं वा भवति।

एतस्य च साधनक्रमः उदाहरणरुपेण प्रस्तूयते अत्र–

निवासकर्तुः नाम = परमेश्वरदयालः
कल्पितम् इष्टनक्षत्रम् = आर्द्रा (षष्ठसंख्याकम्)
कल्पनया इष्टायः = ध्वजः (प्रथमः आयः)।

---

3. मुहूर्त्तचिन्तामणिः, पीयूषधारा, वास्तुप्रकणम्, 5 श्लोकः।
4. मुहूर्त्तचिन्तामणिः, वास्तुप्रकरणम्, 3 श्लोकः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अतः सूत्रानुसारेण गणितकरणेन गृहपिण्डानयनम्–
कल्पिता इष्टनक्षत्रसंख्या 6–1=5 = एकोनिता इष्टनक्षत्रसंख्या।
एकोनिता इष्टनक्षत्रसंख्या 5x152=760 = प्रथमं गुणनफलम्।
कल्पिता इष्टायसंख्या 1–1=0 = एकोनिता इष्टायसंख्या।
एकोनिता इष्टायसंख्या 0x 81=0 = द्वितीयं गुणनफलम्।
प्रथमं गुणनफलं 760 + द्वितीयं गुणनफलं 0 = 760 = योगफलम्।
योगफलम् 760 + 17 = 777 = सम्पूर्णं योगफलम्।
सम्पूर्णं योगफलम् 777 ÷ 216 =

अत्र भागफलं 3 इति तु प्रयोगाभावात् त्याज्यम् अस्ति।
तथा च शेषफलम् = 129 इति गृहस्य पिण्डमानम् अस्ति।
अतोऽत्र परमेश्वरदयालस्य गृहस्य पिण्डमानं (क्षेत्रफलमानं वा) = 129 इति सिद्धं भवति।

जनाः स्वप्रकृत्याधारेण, स्वस्तरानुसारेण, स्ववर्गाधारेण वा निवासाय गृहाणां निर्माणं कारयन्ति। कदाचित् लघुगृहमेव पर्याप्तं भवति, कदाचित्तु ते महदाकारकं प्रासादं वा निर्मातुमिच्छन्ति। कदाचित् आगतपिण्डमानात् अपि बहुगुणितक्षेत्रफलस्य गृहस्य निर्माणं कोटिपतिभिः धनिकैः अत्युच्चवर्गीयजनैश्च कार्यते हि। तदानीम् अस्माभिः साधितं पिण्डमानं तु अत्यल्पमेव भवति प्रायः। अतः तस्मिन् समये तस्य अत्यल्पपरिमाणकस्य पिण्डमानस्य इच्छानुगुणं कर्तुम् अन्यविधिं वदन्ति। तत्र यदि पिण्डमानं भूखण्डमानादल्पं भवति तथा शेषपिण्डमाने 216 इति संख्यायोजनेन पिण्डप्रमाणमधिकं जायते। यदि एतदति पूर्वसाधितं 129 अस्ति। एतत् मानं चयनितभूखण्डादल्पमस्ति। अतः अस्मिन् २१६ संयोजनेन ३४५ इति क्षेत्रफलमायाति एतदपि चयनितभूखण्डादल्पमस्ति अतः पुनः अस्मिन् २१६ योजयित्वा ५६१ इति मानं प्राप्तमस्ति एतत् मानं भूखण्डासन्नमस्ति अतः एतदेव पिण्डमानं क्षेत्रफलं वेति भवति बृहद्वास्तुमालादिषु ग्रन्थेषु अनेकर्षीणां पिण्डसाधनोपयोगीनि सूत्राणि प्रतिपादितानि सन्ति। तदनुरूपमेव पिण्डसाधनं समानमेव आयाति। एवमेव यद् पिण्डमानमागतं भवति तदेवाधिकृत्य गृहाकारानुरुपमेव गृहनिर्माणं कुर्यात्। यदि वृत्ताकारं गृहं स्यात् तदा समागतपिण्डस्य मानं व्यास परिधिसम्बन्धद्वारा तदनुगुणं वृत्ताकारं कुर्यात् एवमेव प्रकारेण गणितीयविधिना त्रिकाणोर्धवृत्तवृत्तादीनां गृहाकारानुरूपं पिण्डसाधनं विधाय वास्तुशास्त्रोक्तेन नियमेन यथादिक् स्नानादिकक्षनिर्माणं कृत्वा सुखेन जीवनं यापयेदिति शम्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वैदिकवाङ्मये वास्तुविद्यायाः दिग्दर्शनम्

श्रीशिवप्रसादरैना

वास्तुशब्दस्य तात्पर्यं निवासस्थानादस्ति। अस्य शब्दस्योत्पत्तिः 'वस्' धातोः अस्ति, यत्तु निवासार्थे प्रयुक्तो भवति। अनेन प्रकारेण वास्तोः तात्पर्यं भवननिर्माणयोग्यभूखण्डेनास्ति। भूखण्डस्य शुभाशुभपरीक्षणं भवननिर्माणविधेश्च ज्ञानं येन शास्त्रेण भवति तदेव वास्तुशास्त्रम्। प्राकृतिकतत्त्वानां पंचमहाभूतानां च सामंजस्येन उत्तमभवनस्य निर्माणयोजना अतिप्राचीनकालादेव वास्तुशास्त्रस्य उद्देश्यम् अस्ति। वास्तुशास्त्रं पंचमहाभूतैः निर्मिते प्राणिजीवने एतेषां महाभूतैः निर्मितवातावरणेन साकं तस्य सामंजस्यं स्थापयति। एतेषां महाभूतानां संतुलनेनैव प्राणी क्रियाशीलः स्वस्थं च भवति परन्त्वेतेषाम् असंतुलेनैव सः निष्क्रियः अस्वस्थं च भवितुं शक्यते। अतः मनुष्यस्य शारीरिक-मानसिकक्षमतासु अभिवृद्धिं कृत्वा तं स्वस्थं गतिशीलं च कर्त्तुं वास्तुशास्त्रस्य आचार्याः मानकनियमानां सिद्धान्तानां च प्रतिपादनं कृतवन्तः।

भारते पुराकालादेव वास्तुकलाया अद्भुतोदाहरणानि प्राप्यन्ते। भारतीयाः शास्त्रस्यास्य विकासः स्वजीवने एतेषामुपयोगितां समभिलक्ष्य कृतवन्तः। यस्य वर्णनं वेदेषु पुराणेषु प्राचीनसाहित्येषु वास्तुशास्त्रस्य मानकग्रन्थेषु च प्राप्यते। वैदिककालस्य यज्ञमण्डप-यज्ञशाला-पर्णकुटी-गोशाला- प्रासादप्रभृतिरचनाः रामायणकालस्य अयोध्यालंकाप्रभृतिनगराणां योजना, महाभारतकालस्य मयासुरनिर्मिताः इन्द्रप्रस्थनगर-सभाभवनादयः विश्वकर्मद्वारा द्वारकानगरस्य योजना, सिन्धुघाटीसभ्यतायाः नगरनिर्माणयोजना, मौर्यराजवंशकालिकभवनादयः सुदर्शनजलाशयश्च, प्राचीनहिन्दूशासकैः निर्मिताः राजप्रासाद-दुर्गादिसंरचनाः मध्यकालिकराजपूतशासकानां मुस्लिमशासकानां च दुर्ग-प्रासाद-चैत्यादिसंरचनाः वास्तुकलायां भारतीयां दक्षतां कलाप्रियतां च प्रदर्शयति।

वेदशब्दस्योत्पत्तिः 'विद्'धातुनास्ति, यः विभिन्नार्थकेऽस्ति यथा - ज्ञाने, सत्तायाम्, लाभे, विचारणे, चेतनाख्याननिवासेषु चेति।[1] पुरातनहिन्दुमतावलम्बिनां मतानुसारेण वेदाः ईश्वरीयज्ञानस्य प्रतिपादकाः सन्ति। वेदास्त्वपौरुषेयाः (ईश्वरीयरचना) तपोनिष्ठाः ऋषयः स्वयोगबलैः वेदस्य सर्वप्रथमं दर्शनं कृतवन्तः। महर्षिवेदव्यासेन सम्प्रत्युपलब्धव्यवस्थितरूपे वेदानां संग्रहः कृतः। वेदास्तु वास्तुशास्त्र-विषयकाः स्वतन्त्रग्रन्थाः न सन्त्यपितु तेषु तत्कालीनसामाजिक-राजनीतिक-धार्मिक-दार्शनिकादि-

---

1. ऋग्वेदभाष्यभूमिका स्वामिदयानन्द उद्धृत संस्कृत साहित्य का इतिहास - गैरोला पृ. 26

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विषयाणामुपरि विवेचनसमये प्रसंगवशादेव ज्योतिषविषयेऽपि यत्किंचित् वर्णनमुपलभ्यते तेनैव वैदिककालिकवास्तुशास्त्रस्य समृद्धज्ञानस्य परिचयः प्राप्यते।

न केवलं भारतीयसाहित्ये अपितु विश्वसाहित्येऽपि ऋग्वेदः सर्वाधिकप्राचीनः। तस्मिन् स्थापत्यसम्बन्धिनः विविधोल्लेखाः प्राप्यन्ते। अनेन ज्ञायते यद् भारतवर्षे अत्यन्तप्राचीनकालादेव भवननिर्माणस्य सम्यक् ज्ञानमासीत्। ऋग्वेदातिरिच्य यजुर्वेदादिपरवर्तीवैदिकसाहित्येऽपि एतादृशाः समुल्लेखाः प्राप्यन्ते, यद्वास्तोः विविधांगानि व्यनक्ति। विशेषतः ऋग्वेदे अथर्ववेदे च भवनविन्यासस्य यद्रूपं समुपलभ्यते तस्य परम्परा भारतेऽनवरतरूपेण प्रचलिता अस्ति।

भारतदेशे आवैदिककालादेव वास्तुशास्त्रस्य ऐतिहासिकपरम्परा अस्ति। अतः स्थापत्यवेदरूपे अथर्ववेदस्योपवेदत्वेन शास्त्रमिदं प्रसिद्धमस्ति, अपि च तत्र विशदरूपेण वर्णितं दरीदृश्यते। वैदिकसंहितासु वास्तुशास्त्रस्य सामग्र्यः प्रचुरमात्रायां समुपलभ्यन्ते।[2] यथा धार्मिकवास्तुनः प्रयोगः यज्ञवेदिकारूपे दृश्यते। इष्टिकानामनेकनामानि तेषां प्रकारः प्रयोगः मापानि च। जनोपयोगिनः प्रासाद-राजप्रासाद-गृहादिवास्तुनः विस्तृतं वर्णनम्। पशुनामुपयोगार्थं शालानां सदनानां वा प्रयोगः। ऋग्वेदे वास्तुशब्दस्य अर्थः निवासः गृहं वास्ति[3] अथर्ववेदे सुन्दरगृहाय सुवास्तु तथा च गृहाभावाय अवास्तु शब्दः मिलति।[4]यजुर्वेदसंहितासु वास्तुशब्दस्य प्रयोगः यज्ञवास्तोः सन्दर्भे दरीदृश्यते, किन्तु सूत्रग्रन्थेषु सामान्यनिवासरूपे कौशिकगृह्यसूत्रे च वास्तोः तात्पर्यं मृतकसंस्कारस्थलरूपे मिलति।[5]ऋग्वेदे गृहार्थं 30 शब्दानां प्रयोगः समुपलभ्यते।[6] निघण्टु गृहस्य 22 पर्यायान् कथयति।[7]अथर्ववेदस्य शालासूक्ते[8] भवननिर्माणवर्णने तथा च यजुर्वेदे[9] वास्तुशब्दानां प्रयोगः प्रायः यूप-स्तूप-आसन्दिका-पर्यकादिनिर्माणप्रसंगे मिलति। शतपथब्राह्मणे यज्ञादिप्रसंगे चिति-इष्टिकादिवर्णनं मिलति।[10]यज्ञवेदिकानिर्माणे शुल्वसूत्राणां विशिष्टस्थानमस्ति। अत्र शुल्वशब्दस्यार्थः रज्जु। रज्जुना एव वेदीनिर्माणस्य कार्याणि सम्पादितानि भवन्ति स्म। यज्ञवेदीनिर्माणे बोधायन-आपस्तम्ब-कात्यायनशुल्वसूत्राणां तथा च भूमिचयन-भूशोधन-भूमिपूजनादिके शांखायन-पारस्कर-आश्वलायनगृह्यसूत्राणां महत्वमासीदस्ति च।[11]

---

2. यथा द्रष्टव्यं ऋग्वेद 8.55, अथर्ववेद 3.12, 9.3 इत्यादि
3. ऋग्वेद 8.19.36
4. अथर्ववेद 12.7.7
5. उद्धृत वास्तुशास्त्रविमर्श तृतीयपुष्प सम्पादकीय पृ. x
6. द्रष्टव्य ऋग्वेद 2.3.8, 1.154.6, 8.10.5, 6.16.33, 1.121.2, 4.53.6 इत्यादयः
7. निघण्टु 3.4 , निरुक्त 3.13.9
8. अथर्ववेद 3.12, 9.3
9. तै.सं. 1.3.6.3, वाजसनेयी सं. 3.5, 19.46, 20.1
10. द्रष्टव्यं शत.ब्रा. 7.1.20, 8.1.5, 6.1.2.22-23-29
11. उद्धृत वास्तुशास्त्रविमर्श तृतीयपुष्प सम्पादकीय पृ. xi

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

आरम्भकालादेव वास्तुशास्त्रे वास्तुपुरुषस्यावधारणा वैदिककालादेव दरीदृश्यते, यस्याराधनया गृहे सुखमागच्छति। अस्य देवस्य निर्माणादिकार्ये सम्बन्धः नास्ति परन्तु गृहस्य रक्षणाय पालनाय चास्य महत्वपूर्णभूमिका दरीदृश्यते। ऋग्वेदे ऋषिः वास्तोष्पतिं समाराधयन् कथयति यत् –

वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः।
यत्त्वे महे प्रति तन्नो जुषस्व शं नो भव द्विपदे चतुष्पदे॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरासस्ते सख्ये स्याम पितेन पुत्रान् प्रति नो जुषस्व॥

वास्तोष्पते शग्मया संसदा ते सक्षीमदि रण्वया गातुमत्या।
पाहि क्षेत्र उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः॥[12]

एषु मन्त्रेषु रक्षार्थं, पालनाय, धनप्राप्त्यर्थं, सुखाप्तये, गृहकल्याण च मुख्यरूपेण प्रार्थना अस्ति। अनेन प्रकारेण ऋग्वेदस्य अस्मिन् मन्त्रे कामना वर्तते यदस्माकं निवासस्थानं सर्वप्रकारेण सुरक्षितो भवेत्। तद्यथा –

सुप्रावीरस्तु स क्षयः प्र नु यामन् त्सुदानवः।[13]

अपि च –

ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छव शर्म दीर्घश्रुत।[14]

अर्थादस्माकं गृहं द्रोहकारिभ्यः निन्दकेभ्यः सुरक्षितो भूत्वा दीर्घकालपर्यन्तं सुस्थिरो भवेदिति। एवं प्रकारेण अश्विनीकुमाराभ्यां प्रार्थनास्ति यदस्माकं यशः छर्दिश्च स्थिरो भवेत्।[15] तत्रैवोल्लिखितमस्ति यदतिथि–उपासकौ धनधान्यपुत्रपौत्रादिभिः सुसम्पन्ने गृहे एव निवसाय इच्छतः।[16] अतः ऋग्वेदे सन्तति–यश–धन–धान्यादिभिः पूर्णगृहस्य कामना अस्ति। अनेन सिद्धयति यत् तस्मिन् काले मानवः पूर्णगृहसुखाय प्रयत्नशीलो भवति स्म। सुन्दरं समृद्धं विशालं सुरक्षितं च गृहं भवेदिति कामनायुक्तः मानवः प्रार्थयति यदहं तु मृण्मयगृहे न अपितु तव बृहत्परिमाणयुक्ते सहस्रद्वारयुते गृहे गन्तुकामोऽस्मि।[17]

---

12. ऋग्वेद 7.54.1–3
13. ऋग्वेद 7.66.05
14. ऋग्वेद 7.16.08
15. ऋग्वेद 7.74.5
16. ऋग्वेद 7.67.10, 7.40.5
17. ऋग्वेद 7.1.11

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अनेन प्रकारेण तदा मृण्मयगृहतः विशालसहस्रद्वारयुक्तगृहस्य परिकल्पना दृश्यते। तस्मिन् काले त्वष्टृ-ऋभू प्रसिद्धवास्तुकारौ आस्ताम्।[18]

वैदिकसाहित्ये यज्ञवेदिका-गृह-ग्राम-पुरप्रभृतिसंरचनानां विषये अनेकेषु स्थलेषु वर्णनं सम्प्राप्यते। आभिः संरचनाभिः तत्कालीनवास्तुशास्त्रस्य स्थितिविषये ज्ञायते। अत्र वैदिकसाहित्योपलब्धेषु केषाचिंत् वास्तुतत्त्वानां विषये प्रस्तूयते -

यज्ञवेदिका -ऋग्वेदस्य एकेन मन्त्रेण ज्ञायते यत् तदा वेदिका प्रायः वर्गाकारा भवति स्म। तद्यथा -

चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम्॥[19]

अस्यामृचायां प्रयुक्त 'सुपर्ण' शब्दः गरुडाकारवेदिकायाः (श्येनचिति) प्राशस्त्यविषये संकेतयति। शतपथब्राह्मणे[20] वेदिकायाः वर्णनप्रसंगे कथितमस्ति यत् वेदिका पूर्वं प्रति 3 वितस्तिमिता दीर्घा भवेत्। पश्चिमं प्रति तस्याः विस्तृतिरधिका तथा च मध्ये तस्याः आकारः संकुचितो भवेत्। एवमेव चितीनामर्थात् अग्निप्रज्ज्वलितयज्ञवेदिकानां निर्माणम् इष्टिकाभिः भवति स्म।[21] अनुमीयते सर्वप्रथममपक्वेष्टिकाभिः चितीनां निर्माणं भवति स्म परन्तु शनैः शनैः पक्वेष्टिकाभिरपि वेदिकानां निर्माणं जातम्। शतपथब्राह्मणे यज्ञादिप्रसंगे चितिवर्णनम्[22], इष्टिकानिर्माणम्[23] इष्टिकाप्रमाणानि प्रकाराश्च[24] विस्तरेण वर्णिताः सन्ति।

यूपः स्तम्भो वा- वैदिकसाहित्ये स्कम्भ-यूपशब्दौ स्तम्भाय प्रयुक्तौ स्तः। ऋग्वेदस्य एकस्मिन् मन्त्रे इन्द्राय सर्वोच्चस्तम्भयुक्तदेवः कथितः।[25] तत्रैव सहस्रस्तम्भयुक्तभवनस्य वर्णनं मिलति। तद्यथा -

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते।[26]

---

18. ऋग्वेद 7.89.01, 7.88.5
19. ऋग्वेद 10.114.3
20. शतपथब्राह्मण 1.2.5
21. शतपथब्राह्मण 8.1
22. शतपथब्राह्मण 7.1.20, 8.1-5
23. शतपथब्राह्मण 6.1.2, 22, 23,29 इत्यादि
24. शतपथब्राह्मण 8.7.2.17
25. ऋग्वेद 10.11.15 उद्धृतं भारतीयवास्तुकला का इतिहास पृ.42
26. ऋग्वेद 2.41.5

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

यजुर्वेदे वास्तुप्रयोगः यज्ञपरकः। तत्र यूपनिर्माणं[27] स्तूपनिर्माणं[28] आसन्दिकापर्यकादिनिर्माणं[29] च विस्तरेण वर्णितमस्ति। कृष्णयजुर्वेदे कथितमस्ति यत् यूपस्य यद्भागः भूमेरन्तः भवति तत्तु पितृणां भवति। भूमेरुपरि मेखलापर्यन्तं मनुष्याणां, मेखला तु वनस्पतीनां, मेखलोर्ध्वं शीर्षस्याधोभागश्च सर्वदेवानां, शीर्षस्थानं इन्द्रस्य एवं शेषभागः साध्यानां भवति।[30] अनेन कारणेन स्तम्भानामुपरि पितृणां, मनुष्याणां, वनस्पतीनां, देवादीनां च चित्राकंनस्य प्रथा समुपन्ना जाता।

तदारभ्य यूपस्य धार्मिकमहत्वं दरीदृश्यते। तस्यारोपणपूर्वमेव केषाचिंत् मन्त्राणामुच्चारणं भवति स्म। एभिः मन्त्रैः यूपस्याकारादिविषये ज्ञायते। तस्य वनस्पतिसंज्ञा, यूपनिर्माणाय कस्यचित् पवित्रवृक्षस्य काष्ठस्य प्रयोगो भवति स्म, इति संसूचयति। यूपस्य स्थापना अग्निवेदिकायाः (चितितः) पूर्वे भवति स्म।[31] ब्राह्मणग्रन्थेषु यूपानां उच्छ्रायादिविषये वर्णनं मिलति। तत्र अष्टकोणीययूपस्योल्लेखः समुपलभ्यते। सम्भवतः एभिः स्तम्भैरेव अनन्तरमष्टकोणीयप्रस्तरस्तम्भानां विकासोऽभवत्।[32] ऋग्वेदे परवर्तिसाहित्येषु च यूपस्य विशेषप्रकारस्योल्लेखाः लभ्यन्ते। एषु यूपेषु बलिपशवः बद्धाः भवन्ति स्म।[33]

गृहम् –ऋग्वेदे 'गृह'शब्दः निवासस्य कृते प्रयुक्तो दृश्यते। यथा –

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥[34]

अपि च

सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा॥[35]
यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना॥[36]

---

27. तैत्तिरीय संहिता 1.3.6.3
28. वाजसनेयी संहिता 35
29. वाजसनेयी संहिता 19.86, 20.1
30. कृ.यजु. 6.3.4 उद्धृतम् भारतीयवास्तुकला का इतिहास पृ. 43
31. भारतीयवास्तुकला का इतिहास पृ. 42
32. भारतीयवास्तुकला का इतिहास पृ. 42
33. वैदिक इण्डेक्स जिल्द 2, पृ. 194 उद्धृत भारतीयवास्तुकला का इतिहास पृ. 42
34. ऋग्वेद 3.53.6
35. ऋग्वेद 4.49.6
36. ऋग्वेद 8.10.1

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथर्ववेदे[37] ब्राह्मणग्रन्थेषु[38] अपि अस्मिन्नेवार्थे शब्दोऽयं प्राप्यते।ऋग्वेदे गृहस्यार्थे वास्तु-शरण-शर्म-गय-वरुथ्य-सदन-दुरोणादीनां[39]प्रायः त्रिंशच्छब्दानां प्रयोगः दरीदृश्यते।[40] निरुक्ते द्वाविंशतिप्रकाराणां दम-गृह-गय-पस्त्या-सदन-सद्म-दुरोण-हर्म्य-शाल-अगार- आयतनादिसंज्ञकानां गृहाणां वर्णनं मिलति।[41] तत्र गयस्याभिप्रायः पूर्णगृहस्थस्य आवासयोग्यस्थानादासीत्। यथा -

यः स्नीहितीषु पूर्व्यः यंजग्मानासु कृष्टिसु। अरक्षद्दाशुषे गयम्।[42]

एवमेव आवस्थशब्दः अतिथिगृहार्थं प्रयुक्तो दृश्यते।[43] विशालभवनं तु राजप्रासादः[44] सामान्यगृहाद्विपुलं गृहं सदननाम्ना प्रसिद्धमासीत्।[45]

तत्र वैदिककाले गृहस्य प्रमुखभागाः द्वाराणि (आवागमनस्य मुख्यमार्गः), सदस् सभा वा (आस्थानमण्डपवत् पुरुषाणामुपवेशनकक्षः), पत्नीसदनं (अन्तःपुरः अथवा स्त्रीणां कक्षः), कोष्ठः (भण्डारगृहम्), अग्निशाला (यज्ञमण्डपम्), पशुशाला (अश्वमती गोमती शाला[46]), कोषगृहम्[47] चासन्। शतपथब्राह्मणे गृहस्य विभिन्नकक्षाणां रोचकवर्णनं मिलति।[48]तैतिरीयारण्यके **धनधानी**[49] शब्दस्य प्रयोगः मिलति। यत्तु सम्भवतः कोषागारार्थं विशेषकक्षो भवति स्म। एवमेव अथर्ववेदे पत्नीनां सदनमिति उल्लिखितं वर्तते, येन गृहे स्त्रीणां कृते विशेषभवनस्य व्यवस्था दृश्यते।[50] त्रिवरुथगः[51] त्रिभुजशयानः[52] त्रिधातुशर्मन्[53] त्रिधातुशरणम्[54]वा संज्ञा त्रितलयुक्तभवनानामासीत्। सामान्यभवनेषु गृहस्य

---

37. अथर्ववेद 7.83.1, 10.6.4 आदि
38. यथा ऐतरेय ब्राह्मण 8.21 इत्यादि
39. ऋग्वेद 2.3.8,1.154.6, 6.16.33, 1.121.2, 4.53.6, 8.101.5,10.11.9,7.92.3 आदि
40. वास्तुशास्त्रविमर्श तृतीयपुष्प भूमिका पृ.11
41. निघण्टु 3.4, निरुक्त 3.13.9
42. ऋग्वेद 1.74.2 एवमेव द्रष्टव्यं 5.10.3, 5.44.7 अपि च अथर्ववेद 2.6.3, 6.84.1
43. छा. उप. 4.1.1
44. बृ.उप. 4.3.37
45. वाज. संहिता 12.79
46. अथर्ववेद 3.12.2 अपि च गोभ्यो अश्वेभ्यो नमो यच्छाशालां विजयते - अथर्ववेद 9.3.13
47. कोषे कोषाः समुज्झिताः - अथर्ववेद 2.3.20
48. शतपथब्राह्मण 3.5.1.11
49. तै.आर. 10.67 उद्धृत भारतीय वास्तुकला का इतिहास पृ. 40
50. ए स्टडी ऑन वास्तुविद्या- तारापद भट्टाचार्य उद्घृत भारतीय वास्तुकला का इतिहास पृ. 40
51. ऋग्वेद 8.20.21
52. अथर्ववेद 8.9.2
53. ऋग्वेद 8.40.12
54. अथर्ववेद 20.83.1 डॉ. पी.घोषालमहोदयमतानुसारेण शीतातपवर्षाभ्यः सुरक्षितं गृहमेव त्रिधातुशरणमस्ति - Lifestyle of Vedic People, Page60

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मुख्यतः त्रीणि अंगानि आसन् - गृहद्वारं सभा पत्नीसदनं च। तदा गृहसुरक्षार्थं गृहाणि आवरणितान्यपि भवन्ति स्म।[55]अथर्ववेदे एकस्मिन् स्थले गृहस्योपमा अलंकृतहस्तिन्या कृतास्ति।[56] हस्तिन्याः पृष्ठभागसदृशः वैदिकगृहाणां आच्छादनं भवतिस्म। गृहाणां आन्तरिकासु बाह्यासु च भित्तिकासु विविधप्रकारकाणामालेखनं भवतिस्म। तत्र सुन्दरगृहस्य तुलना सुसज्जितवधुना सह कृतास्ति।[57] शोभार्थं सर्वाणि वस्तूनि गृहे उपलब्धानि आसन्। यथा -

पूर्णं नारी प्रभर कुम्भमेतत् घृतस्य धाराममृेन
सम्भृताम्.....गृहानुप प्रसीदाभ्यमृतेन सहाग्निना।[58]

तस्मिन् काले भवनानां निर्माणे प्रायः काष्ठवंशादीनां प्रयोगो भवति स्म। यथाथर्ववेदे मिलति-

उपमितं प्रतिमितमथो परिमितामुत।
शालया विश्ववारया बद्धानि विचित्रामसि।।[59]

तदा वंश(बांस)-स्थूण(स्तम्भ)-उपमित(स्तम्भभेद)-प्रतिमित(बीम)-परिमित(क्रासबीम)-वंशशालाजाल(खिडकी फ्रेम)-स्थूणराज(सिरदल)प्रभृतयः गृहनिर्माणे मुख्यांगानि आसन्।[60]शतपथब्राह्मणे वर्णनमस्ति यत् तस्मिन्काले स्थूणराजः दक्षिणतः उत्तरं प्रति भवति स्म।तद्यथा-

तस्मान्मनुष्या उदीचीनवंशमेव शालां वा विमितं वा।[61]

छदिस्[62](छत)इत्यस्य वर्णनं तत्रोपलभ्यते। तदा वंशान् परस्परं ग्रन्थनं कृत्वा गृहस्याच्छादनं भवति स्म।[63] यस्योपरि तृणघासादिकानां विषुवन्तस्य[64]प्रयोगः अनुमीयते। एवमेव **अक्षु**[65] अर्थात् आच्छादनं, **'ग्रन्थींश्चकार ते दृढान्'**[66] अर्थात् वंशानां दृढग्रन्थिविषये वर्णनं दरीदृश्यते। तदा गृहाणाम् आच्छादनं गजपृष्ठाकारे अनुमीयते।[67]**अपस्थूण** शब्देन अनुमीयते यत् तस्मिन् काले यदा कदा

---

55. उद्धृतभारतीयवास्तुकला का इतिहास पृ. 39
56. अथर्ववेद 9.3.17
57. अथर्ववेद 9.3.24
58. अथर्ववेद 3.20.8-9
59. अथर्ववेद 3.5.11
60. भारतीयवास्तुशास्त्र एक चिन्तन- वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17
61. शतपथब्राह्मण 3.1.17
62. ऋग्वेद 10.85.10, अथर्ववेद 3.12.3
63. वंशानां नहानानाम् - अथर्ववेद 9.3.4
64. अथर्ववेद 9.3.8 उद्धृतं वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17
65. ऋग्वेद 1.108.5, अथर्ववेद 8.8.18 उद्धृतं वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17
66. अथर्ववेद 9.3.3 उद्धृतं वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17
67. अथर्ववेद 9.3.24 उद्धृतं वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

स्वर्णादिधातूनामपि प्रयोगः अलंकरणाय दृढार्थं च भवति स्म।[68]तस्मिन् काले पलद-तृण-मुंज-शर-कुशा-वीरणादिवस्तुप्रभेदानुसारेण गृहस्याच्छादनं भवति स्म।

ग्रामव्यवस्था- वैदिकसभ्यता ग्रामप्रधानसभ्यतासीत्। अतः ग्रामशब्दः ऋग्वेदादिसाहित्ये बहुस्थानेषु समुपलभ्यते। शतपथब्राह्मणानुसारेण केचन ग्रामाः परस्परं सन्निकटाः आसन्।[69] केचन ग्रामाः दूरवर्तिनः आसन् ये परस्परं मार्गेण सम्बद्धाः आसन्।[70] ग्रामे प्रायः शुद्धवायुजलादीनां कृते सुन्दरव्यवस्थासीत्। अतः ग्रामे गृहाणि विरलानि आसन्। तदा बहुजनसंख्यायुक्तग्रामाः **महाग्राम**नाम्ना प्रसिद्धाः आसन्।[71] हैवेलमहोदयस्य मतानुसारेण एते ग्रामाः आयताकाराः आसन् तथा तस्य परितः चतुर्दिक्षु एकमेकं द्वारमासीत्।[72] पर्सी ब्राउनमहोदस्य मतमस्ति यत् वैदिकग्रामाणां परितः काष्ठस्य वेष्टनमासीत् तत्र वेष्टनस्य पुरतः एकमथवा अधिकानि तोरणानि द्वाराणि वा निर्मितानि भवन्ति स्म।[73] पुरः - 'पुर' शब्दस्य प्रयोगः ऋग्वेदे बहुषु स्थलेषु प्राप्यते। यथा -

युधा युध मुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा।[74]

तत्रऋग्वैदिककाले पुरशब्दः मुख्यतः दुर्गस्य कृते प्रयुक्तो दृश्यते। अपि च प्राकारस्य कृतेऽपि अनुमीयते।[75]परवर्तिवैदिकसाहित्येऽपि शब्दोऽयं प्राचुर्येण दरीदृश्यते। तदा नगरस्य अर्थे प्रयुक्तोऽस्ति। ऋग्वेदे पुरोपरि आक्रमणं कृत्वा तेषां विनाशस्य वर्णनं मिलति। प्रतीयते तस्मिन् काले पुराणां संख्या अधिकास्ति। सुगमतया तेषां रचना भवति स्म। प्रारम्भे मृत्तिकातः एतेषां निर्माणं भवति स्म।[76] इन्द्रस्य कृते पुरन्दरशब्दस्य प्रयोगः संस्कृतसाहित्ये लभ्यते। तेन पुराणां भेदनं कृतम्।यथा -

अध्वर्यवो यः शतं शम्बरस्य पुरो विभेदाश्मनेव पूर्वीः।[77]

तत्र पुराणां अश्म-आयसीभेदेन द्वौ प्रकारौ लभ्येते।[78] एतेषां कृते एकस्मिन् स्थले शारदीशब्दस्य प्रयोगः दृश्यते।[79] सम्भवतः शरदृतौ बाह्याक्रमणेभ्यः ग्रामरक्षार्थमेतेषां प्रयोगो भवति स्म। तदा

---

68. ऋग्वेद 5.62.8 उद्धृतं वास्तुशास्त्रविमर्श प्रथम पुष्प पृ. 17
69. शतपथब्राह्मण 13.2.4.2
70. छान्दोग्य उपनिषद् 8.6.2
71. वैदिक इण्डेक्स जिल्द 1, पृ. 244-45 उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 36
72. उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 36
73. उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 36
74. ऋग्वेद 1.53.7 एवमेव द्रष्टव्यं 1.131.1, 1.131.4 , 1.132.4 , 1.174.2 इत्यादयः
75. वैदिक इण्डेक्स जिल्द-1, पृ. 538-539, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 37
76. दि वैदिक एज उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 37
77. ऋग्वेद 2.14.6
78. द्रष्टव्यम् ऋग्वेद 2.14.6 एवं च 2.20.8
79. ऋग्वेद 1.174.2

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भित्तियुक्तपुराणामुल्लेखोऽपि दरीदृश्यते। यथा –

शतभुजिभिस्तमभिह्नुतेरघात्पूर्वी रक्षता मरुतो यमावत।[80]

अतः वैदिकपुराः मुख्यतः बाह्याक्रमणेभ्यः रक्षासाधनानि आसन्। ते प्रकारादिभ्यः सुरक्षिताः दृढमृत्तिकाप्राचीरेभ्यः युक्ताः भवन्ति स्म।[81]

अन्यविषयाः– एतदतिरिक्तं तत्र श्मशानस्यापि उल्लेखो मिलति।[82] अथर्ववेदे बहुषु स्थलेषु शब्दस्यास्य प्रयोगः लभ्यते।[83] श्मशानशब्दः तस्य समाधिस्थलस्य द्योतकः यस्याधोभागे मृतकस्य अस्थीनि स्थापितानि भवन्ति। शतपथब्राह्मणे शवान्नम् (शवस्य कृते अन्नम्) अथवा श्मशान्नम् (पितृणां भोजनम्) इत्यर्थे शब्दस्यास्य प्रयोगः कृतः।[84] यास्केन शवशयनार्थे अर्थात् मृतकस्य विश्रामस्थलार्थे श्मशानशब्दः स्वीकृतः।[85] बेवर महोदयमतेन अश्मन् शयनम् इत्यनेन श्मशानशब्दोत्पत्तिः स्वीकृता।[86]शतपथब्राह्मणे श्मशाननिर्माणविषयकाः नियमाः कथिताः सन्ति।[87]

वैदिकवाङ्मये रथ[88]–चिति[89] पशुसद्म[90]प्रभृतिरचनानामपि वर्णनं समुपलभ्यते। येषां निर्माणादिविधयः न केवलं प्राचीनवास्तुशास्त्रस्य अपितु अर्वाचीनवास्तुकलायाः अपि मूलाधारे स्थिताः सन्ति।

---

80. ऋग्वेद 1.166.8 अपि च अधा मही न आयस्यनाधृष्टो नीपीतये। पूर्भवा शतभुजि। – ऋग्वेद 7.15.14
81. वैदिक इण्डेक्स जिल्द 1 पृ. 538–539, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 37
82. वैदिक इण्डेक्स जिल्द 1 पृ. 397, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 43
83. अथर्ववेद 2.11.17,8.33.6, 10.23.1 आदि
84. शतपथब्रा. 13.8.1.1
85. निरुक्त 3.5
86. उद्धृत भारतीयवास्तुकला का इतिहास पृ. 43
87. शतपथब्राह्मण 13.8.1–4
88. ऋग्वेद 1.129.1
89. शतपथब्राह्मण 8.1
90. अथर्ववेद 9.3.13

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जीर्णादिशिवलिङ्गन्यासविधानम्

श्रीविजयकुमारः

भारतीयसंस्कृतौ आध्यात्मिकज्ञानधारा वैदिककालादेव सृष्ट्यारम्भतः वा सततं विद्यमानास्ति। आवैदिककालाद् आध्यात्मिकपरिप्रेक्ष्ये देववन्दनं पूजनं जपार्चनञ्च दृश्यते। विभिन्नसम्प्रदायेषु विभक्तास्ति एषा आध्यात्मिकधारा। तासां मुख्याः शक्तिपूजकाः शाक्ताः, विष्णूपासकाः वैष्णवाः शिवसाधकाः शैवाश्च इत्युच्यन्ते। विभिन्नसम्प्रदायेषु पूजनार्चनादीनां विविधनियमानां विधीनाञ्च वर्णनं प्रतिपादितम्। एवमेव शैवधर्मे शिवलिङ्गपूजनविषयेऽपि केचन विशिष्टाः नियमाः प्रतिपादिताः। शिवपुराणे[1] एतेषां नियमानां वर्णनं प्राचुर्येण प्राप्यते। शिवस्वरूपविषये वर्णनं चोपलभ्यते यच्छिवः पञ्चमुखदशभुजयुक्तः शुद्धस्फटिक-सदृशकान्तियुक्तः सर्पादिभिरलङ्कृतोऽस्ति। तस्य स्वरूपस्य ध्यानमात्रेण नराणां पापानि विनश्यन्ति। इदं तु प्रतिमानिर्माणाय शिवस्वरूपं वर्तते परन्तु शिवस्य स्तवनाय तस्यापर-स्वरू लिङ्गरूपमस्ति। अपराजितपृच्छायां लिङ्गशब्दस्य निर्वचने कथितमस्ति यत्-

आकाशं लिङ्गमित्याहुः क्षिति स्याज्जलहारिका।
तन्मध्ये सर्वभूतात्मलयनाल्लिङ्गमुच्यते॥[2]

तत्र लिङ्गस्य चलाचलभेदेन मुख्यतया प्रभेदद्वयं दृश्यते। मृण्मयलिङ्गस्य निर्माणं कृत्वा तस्य पूजनादिकं विधाय तस्य जले विसर्जनं क्रियते। इयमेव पार्थिवपूजा। सर्वप्रथमं इयमेव पूजा प्रचलिताऽभवत्। तदा कालान्तरे शिला-काष्ठ-रत्नादिभिः लिङ्गनिर्माणं कृत्वा पूजनस्य पद्धतिः प्रसिद्धा जाता। प्रसङ्गेऽस्मिन् अग्निपुराणे कथितमस्ति[3]-

---

1. प्रथमं च गणाधीशं द्वारपालांस्तथैव च।
दिक्पालांश्च सुसम्पूज्य पश्चात्पीठं प्रकल्पयेत्॥
अथाष्टदलं कृत्वा पूजाद्रव्यसमीपतः।
उपविश्य ततस्तत्र चोपवेश्यं शिवं प्रभुम्॥
त्रयमाचमनं कृत्वा प्रक्षाल्य च पुनः करौ।
प्राणायामत्रयं कृत्वा मध्ये ध्यायेच्च त्र्यम्बकम्॥ (श्रीशिवमहापुराणम्, व्याख्याकारः - डॉ. ब्रह्मानन्दत्रिपाठी, चौखम्बासुरभारतीप्रकाशनम्, अ. 11, श्लोकः 32-34)
2. अपराजितपृच्छा 196/64
3. अग्निपुराण 54/2-3
4. तत्रैव अध्याय 33, श्लोक 01

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भित्तियुक्तपुराणामुल्लेखोऽपि दरीदृश्यते। यथा –

शतभुजिभिस्तमभिह्नुतेरघात्पूर्वी रक्षता मरुतो यमावत।[80]

अतः वैदिकपुराः मुख्यतः बाह्याक्रमणेभ्यः रक्षासाधनानि आसन्। ते प्रकारादिभ्यः सुरक्षिताः दृढमृत्तिकाप्राचीरेभ्यः युक्ताः भवन्ति स्म।[81]

अन्यविषयाः– एतदतिरिक्तं तत्र श्मशानस्यापि उल्लेखो मिलति।[82] अथर्ववेदे बहुषु स्थलेषु शब्दस्यास्य प्रयोगः लभ्यते।[83] श्मशानशब्दः तस्य समाधिस्थलस्य द्योतकः यस्याधोभागे मृतकस्य अस्थीनि स्थापितानि भवन्ति। शतपथब्राह्मणे शवान्नम् (शवस्य कृते अन्नम्) अथवा श्मशान्नम् (पितृणां भोजनम्) इत्यर्थे शब्दस्यास्य प्रयोगः कृतः।[84] यास्केन शवशयनार्थे अर्थात् मृतकस्य विश्रामस्थलार्थे श्मशानशब्दः स्वीकृतः।[85] बेवर महोदयमतेन अश्मन् शयनम् इत्यनेन श्मशानशब्दोत्पत्तिः स्वीकृता।[86]शतपथब्राह्मणे श्मशाननिर्माणविषयकाः नियमाः कथिताः सन्ति।[87]

वैदिकवाङ्मये रथ[88]–चिति[89] पशुसद्म[90]प्रभृतिरचनानामपि वर्णनं समुपलभ्यते। येषां निर्माणादिविधयः न केवलं प्राचीनवास्तुशास्त्रस्य अपितु अर्वाचीनवास्तुकलायाः अपि मूलाधारे स्थिताः सन्ति।

---

80. ऋग्वेद 1.166.8 अपि च अधा मही न आयस्यनाधृष्टो नीपीतये। पूर्भवा शतभुजि। – ऋग्वेद 7.15.14
81. वैदिक इण्डेक्स जिल्द 1 पृ. 538–539, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 37
82. वैदिक इण्डेक्स जिल्द 1 पृ. 397, उद्धृतं भारतीयवास्तुकला का इतिहास पृ. 43
83. अथर्ववेद 2.11.17,8.33.6, 10.23.1 आदि
84. शतपथब्रा. 13.8.1.1
85. निरुक्त 3.5
86. उद्धृत भारतीयवास्तुकला का इतिहास पृ. 43
87. शतपथब्राह्मण 13.8.1–4
88. ऋग्वेद 1.129.1
89. शतपथब्राह्मण 8.1
90. अथर्ववेद 9.3.13

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जीर्णादिशिवलिङ्गन्यासविधानम्

श्रीविजयकुमारः

भारतीयसंस्कृतौ आध्यात्मिकज्ञानधारा वैदिककालादेव सृष्ट्यारम्भतः वा सततं विद्यमानास्ति। आवैदिककालाद् आध्यात्मिकपरिप्रेक्ष्ये देववन्दनं पूजनं जपार्चनञ्च दृश्यते। विभिन्नसम्प्रदायेषु विभक्तास्ति एषा आध्यात्मिकधारा। तासां मुख्याः शक्तिपूजकाः शाक्ताः, विष्णूपासकाः वैष्णवाः शिवसाधकाः शैवाश्च इत्युच्यन्ते। विभिन्नसम्प्रदायेषु पूजनार्चनादीनां विविधनियमानां विधीनाञ्च वर्णनं प्रतिपादितम्। एवमेव शैवधर्मे शिवलिङ्गपूजनविषयेऽपि केचन विशिष्टाः नियमाः प्रतिपादिताः। शिवपुराणे[1] एतेषां नियमानां वर्णनं प्राचुर्येण प्राप्यते। शिवस्वरूपविषये वर्णनं चोपलभ्यते यच्छिवः पञ्चमुखदशभुजयुक्तः शुद्धस्फटिक-सदृशकान्तियुक्तः सर्पादिभिरलङ्कृतोऽस्ति। तस्य स्वरूपस्य ध्यानमात्रेण नराणां पापानि विनश्यन्ति। इदं तु प्रतिमानिर्माणाय शिवस्वरूपं वर्तते परन्तु शिवस्य स्तवनाय तस्यापर-स्वरूपं लिङ्गरूपमस्ति। अपराजितपृच्छायां लिङ्गशब्दस्य निर्वचने कथितमस्ति यत्-

आकाशं लिङ्गमित्याहुः क्षिति स्याज्जलहारिका।
तन्मध्ये सर्वभूतात्मलयनाल्लिङ्गमुच्यते।।[2]

तत्र लिङ्गस्य चलाचलभेदेन मुख्यतया प्रभेदद्वयं दृश्यते। मृण्मयलिङ्गस्य निर्माणं कृत्वा तस्य पूजनादिकं विधाय तस्य जले विसर्जनं क्रियते। इयमेव पार्थिवपूजा। सर्वप्रथमं इयमेव पूजा प्रचलिताऽभवत्। तदा कालान्तरे शिला-काष्ठ-रत्नादिभिः लिङ्गनिर्माणं कृत्वा पूजनस्य पद्धतिः प्रसिद्धा जाता। प्रसङ्गेऽस्मिन् अग्निपुराणे कथितमस्ति[3]-

---

1. प्रथमं च गणाधीशं द्वारपालांस्तथैव च।
दिक्पालांश्च सुसम्पूज्य पश्चात्पीठं प्रकल्पयेत्।।
अथाष्टदलं कृत्वा पूजाद्रव्यसमीपतः।
उपविश्य ततस्तत्र चोपवेश्यं शिवं प्रभुम्।।
त्रयमाचमनं कृत्वा प्रक्षाल्य च पुनः करौ।
प्राणायामत्रयं कृत्वा मध्ये ध्यायेच्च त्र्यम्बकम्।। (श्रीशिवमहापुराणम्, व्याख्याकारः - डॉ. ब्रह्मानन्दत्रिपाठी, चौखम्बासुरभारतीप्रकाशनम्, अ. 11, श्लोकः 32-34)
2. अपराजितपृच्छा 196/64
3. अग्निपुराण 54/2-3
4. तत्रैव अध्याय 33, श्लोक 01

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भूतयेवस्त्रलिङ्गं तु लिङ्ग तात्कालिकं विदुः।
पक्वापक्वं मृण्मयं स्यादपक्त्वात्पक्वजं परम्।
ततो दारुमयं पुण्यं दारुजाच्छैलजं वरम्।
शैलाद्वरं तु मुक्ताजं ततो लौहं सुवर्णजम्॥

शिवपूजने लिङ्गपूजनं विशिष्टं वर्तते। शिवस्य साकारनिराकाररूपद्वयेन पूजनं भवति। साकाररूपे शिवमूर्तेः निराकाररूपे च लिङ्गस्य पूजनं भवति। शिवलिङ्गपूजनेन पापादिनिवृत्तिः तु भवत्येव, तेन शिवलोकप्राप्तिरपि भवति। मयमतमिति ग्रन्थे तुच्छलिङ्ग- अधोगत- ऊर्ध्वगत- बालतरुणलिङ्गादीनां वर्णनं प्रतिपादितं वर्तते[4] तान्यत्र क्रमेण प्रतिपाद्यन्ते। प्रप्रथमं मयमतमाधारीकृत्य त्रिप्रकारकाणां लिङ्गानां वर्णनं प्रस्तूयतेऽत्र। तत्र त्रिविधानि लिङ्गानि–सन्ति निष्कलं सकलं मिश्रञ्च। निष्कलं लिङ्गस्वरूपं, सकलं मूर्तिरूपं मिश्रम् अर्थात् मुखलिङ्गम्, मुखलिङ्गे सकलनिष्कलयोः मिश्रणं भवति। निष्कलं लिङ्गमात्रस्य तथा च सकलं बेरमात्रस्य साङ्केतिकं वर्तते। तन्त्रसमुच्चयेऽपि निरङ्गसाङ्गप्रतिमानां कृते निष्कलं सकलञ्चेति[5] प्रयोगः दरीदृश्यते। मुरारीकृतरत्नावल्यामपि कामार्चान्यार्चादिनाम्नां लिङ्गानां मानं वर्णितमस्ति। यथा[6]–

सकले सतिमूलबिम्बके निगमांशोन्मिति कर्मबिम्बकम्।
सकलाकृतिर्निष्कलेऽपि वा स्थितमासीनमुत प्रकल्पयेत्॥

अर्थात् मूलबिम्बे सकले सावयवे सति निगमांशोन्मिति चतुर्थांशोन्मितं मानं यथा भवति तथा कर्मणि बिम्बकौतुकं कल्पयेत्। निष्कले निरवयवे सकलाकृतिः सावयवत्वेनैव स्थितं स्थिते मूलबिम्बे स्थितम् आसीनमुत आसीनं वा कल्पयेत्। आसीने चोभयथा प्रकल्पयेत्। निगमांशोन्मितीत्येतदुपलक्षणम्।

सकलनिष्कललिङ्गस्य सन्दर्भेस्मिन् भणितमस्ति यत् निष्कलसकलयोः मिश्ररूपमुखलिङ्गमिति भवति। यस्योच्छ्रायः लिङ्गाकृतेः तुल्यं भवति। बिम्बस्य मूर्तिः शरीराभा सदृशमेव भवति। विश्वमूर्तिसदृशं स्ववैशिष्ट्यमिति प्रतिभाति।

भारतीयवास्तुशास्त्रे त्रिविधानां प्रासादशैलीनां प्रचलनमस्ति–नागर–द्राविड–वेसरश्च। प्रासादशैली-मनुसृत्य नागर–द्राविड–वेसरलिङ्गानां वर्णनमपि समुपलभ्यते। सम्पूर्णभारतवर्षे मुख्यतः एतासु शैलीषु शिवालयस्य निर्माणं सम्प्रत्यपि दृश्यते। दक्षिणभारते यथा द्राविडशैल्याः बाहुल्यं वर्तते तथैवोत्तरभारतवर्षे नागरशैल्याः बाहुल्यं वर्तते। तासां शैलीनां कृते लिङ्गानां मानं प्रमाणमपि भिन्नमस्ति। अत्र प्रसङ्गवशात्किञ्चित् वर्ण्यते–

5. उद्धृत तत्रैव पृष्ठ 348

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नागरलिङ्गम्

नागरशैल्यनुसृत्य निर्मितशिवालये प्रासादे वा गर्भगृहस्यार्धमानस्य शिवलिङ्गं मध्यमं भवेत्, प्रासादस्य पञ्चमाशं (1/5) कृत्वा तृतीयांशतुल्यं (1/3) शिवलिङ्गं श्रेष्ठं भवति। यथा[7]-

गर्भार्धमध्यमं श्रेष्ठं पञ्चर्त्यंशं शिवायतम्।
भवन्ति नवलिङ्गानि तयोर्मध्येऽष्टभाजिते॥

श्रेष्ठमध्यकनिष्ठानि त्रित्रिभेदानि तानि हि।
नागरे नागरस्योक्तं मानं लिङ्गस्य मन्दिरे॥
विकारांशे तदायामे सार्वकामिकं नागरे विदुः॥

द्राविडलिङ्गम्

द्राविडजात्यप्रासादस्य गर्भगृहमानं एकविंशति (21) विभागेषु विभक्तेषु दशभागतुल्यं लिङ्गम् अधमं, त्रयोदशांशं तुल्यं लिङ्गं श्रेष्ठं तथा च अधमश्रेष्ठमानयोः योगस्य अष्टमांशतुल्यानि शिवलिङ्गस्य नवविधमानानि भवन्ति। एतेषां लिङ्गानां जयदपौष्टिकसार्वकामिकाश्च संज्ञाः अभिज्ञायन्ते। प्रोक्तं यथा[8]-

गर्भे त्रिसप्तभागे तु दशांश द्राविडेऽधमम्।
त्रयोदशांशकं श्रेष्ठं मध्येऽष्टांशे तु पूर्ववत्॥

त्रिसप्तांशे निजायामे षट्पञ्चचतुरंशकम्।
जयदादिविशालं तत् पूर्ववद् द्राविडे मतम्॥

वेसरलिङ्गम्

गर्भगृहस्याकारसमं वेसरप्रासादे गर्भगृहस्य मानं पञ्चविंशतिसङ्ख्यया विभक्ते सति एतस्मिन् त्रयोदशांशतुल्यं लिङ्गं हीनलिङ्गं तथा च षोडशांशतुल्यं श्रेष्ठं लिङ्गं भवति। यथोक्तम्[9]-

वेसरे पञ्चपञ्चांशे गर्भागारे विमानके।
त्रयोदशांशकं हीनं श्रेष्ठं स्यात् षोडशांशकम्॥
तयोर्मध्येऽष्टभागे तु नवलिङ्गानि पूर्ववत्।
पञ्चपञ्चांशके दैर्घ्यं वसुधातुरसांशकम्॥

6. उद्धृत तत्रैव पृष्ठ 348
7. मयमतम् अ. 33. श्लो. 39½-42½
8. मयमतम् अध्याय 33, श्लोक 42½-44½
9. मयमतम् अध्याय 33ष श्लो, 44½-47

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वेसरस्योदितं व्यासं पूर्ववज्जयदादिकम्॥

अनेन प्रकारेण मयमते विस्तरेण शिवलिङ्गलक्षणादीनि कथितानि सन्ति। तत्र चतुर्णा वर्णानां कृते लिङ्गानां पूजनं वर्णितमस्ति।[10] तत्र कस्य लिङ्गस्य कदा केन प्रकारेण अनुकर्म करणीयमिति अत्र विवेच्यते-

लिङ्गजीर्णोद्धारे विधानम्-

दीप्तागमे कथितमस्ति यत् **'प्रासादलिङ्गपीठानां जीर्णकालेसमुद्धरेत्'**[11] इति। तत्र जीर्णोद्धारः कदा करणीयः इति विषये दीप्तागमे लिखितं वर्तते-

कालक्षेपणजीर्णे हि भिन्ने स्फुटितपातने।
पुराकृतं परित्यज्य लिङ्गपीठनिकेतनम्॥
सौधं च प्रतिमालिङ्गं पुनरावर्त्य मनोरमम्॥

प्रासादभवनादिजीर्णोद्धारस्य विविधविधीनां प्रतिपादनं शास्त्रेषु मिलति एव। प्रासादानां जीर्णोद्धारात्परं लिङ्गजीर्णोद्धारस्य सम्पादनमपि दृश्यते शास्त्रेषु। विभिन्नेषु वास्तुग्रन्थेषु एतेषां नियमानां सिद्धान्तानां प्रतिपादनं दृश्यते। लिङ्गजीर्णोद्धार विषये मयमते प्रोक्तं यत्[12]-

पतितं स्फुटितं लिङ्गं दुस्तरपारासुवृतं च।
वक्रमधोगतलिङ्गं लिङ्गादत्यूर्ध्वगतिलिङ्गम्॥

परितर्कैरूपकामं तदज्ञेन स्थापितं लिङ्गम्।
भिन्नं ज्वलनालीढं जीर्णं सस्फोटनं तु भग्नं च॥

चोरादिभिरुद्धृतं किंदेशं स्थानं तु दूषितैः स्पृष्टम्।
विपरीतमयोगं यल्लिङ्गं सन्दृश्यते तु भुवि॥
तेन सदाशिवमुदितं तज्ज्ञैर्लोकेऽपि जन्तूनाम्।

पतितं वा केनचित् अल्पज्ञमानवेन चाण्डालादिना च स्पर्शितं लिङ्गं यदि भवेत् तदा तत्स्थाने नूतनलिङ्गस्य स्थापनस्य निर्देशः।[13] एतस्मिन् सन्दर्भे तुच्छलिङ्गस्य वर्णनमपि प्राप्यते।[14] लिङ्गस्य

---

10. मयमतम्, अध्यायः -33, श्लोकः 72-73
11. दीप्तागम 59/1
12. मयमतम्, अध्यायः 35, श्लोकः 15-17
13. तत्रैव, अ. 35, श्लो.18
14. मयमतम्, अध्यायः 35, श्लोकः 18-20

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जीर्णोद्धारावलम्ब्य ऊर्ध्वगतस्य[15] अधोगतस्य[16] लिङ्गस्य च वर्णनमपि मयमते दृश्यते। ज्ञातकालात् भूमिगतलिङ्गं अधोगतलिङ्गं तथा च अज्ञातकालात् किमपि लिङ्गं यदि भूमेः अधोस्थितं भवेत् तर्हि तादृशानां लिङ्गानां पुनः तत्रैव स्थापनं करणीयं, यदि तेषु लिङ्गेषु कश्चिदपि विकारः न भवेत्।

सर्वलक्षणयुक्तं लिङ्गं यदि मन्त्रक्रियादिभिर्हीनं भवेत् तत् पुनः विधिपूर्वकं स्थापनयोग्यं भवतीति।[17] एवमेव लिङ्गस्वरूपवशादपि तस्य जीर्णोद्धारस्य निर्देशो लभ्यते तत्र। अग्निदग्धपतितजीर्ण-लिङ्गस्य स्थापनं पुनर्विधिविधानेन करणीयम्। वास्तुविदां मतानुसारेण कार्यं सम्पादनीयं तथा च जीर्णोद्धारकाले लिङ्गस्य दिशा-विदिशादीनां स्थितिः सम्यग्विचारणीया। सन्दर्भेऽस्मिन् प्रोक्तं यथा[18]-

हीनं ज्वलनालीढं सस्फोटकं च भग्नं च।
लिङ्गं सार्घ्यं त्यक्त्वा पुनस्तत्स्थापयेन्नवं लिङ्गम्॥

अधोत्तरमज्ञानानां मोहेन वाप्यन्यदाननयुक्तम्।
विपरीतं त्यजेत्सहसा उचितं यन्नवमन्यत्तत्रैव स्थापयेद्विधिना॥

अर्थात् हीन- अग्निदग्ध- जीर्ण- स्फुटितलिङ्गस्य पूजनं सततं भवति चेत् तदा तत्स्थाने नूतनलिङ्गस्य स्थापनं करणीयम्। स्थापनकाले लिङ्गस्योर्ध्वभागस्य स्थापनमधोः भवेत् तथा च विपरीतदिशि यदि स्थापनं भवति तदा विधिमनुसृत्य नूतनलिङ्गस्य स्थापनं करणीयमिति।

तलभित्तिद्वारशिखरादीनि प्रासादस्याङ्गानि भवन्ति। तैः प्रासादस्य सम्पूर्णरूपं स्वरूपञ्च परिलक्षितं भवति। एवमेव योनि तल-अक्षादीन्यपि लिङ्गस्याङ्गानि भवन्ति। एतस्मात् हीनं लिङ्गं दोषकारकं मन्यते। तल-अक्षादिभिः रहितलिङ्गस्य स्थापनं वर्जनीयं वर्तते। यथासम्भवं एतादृशानि लिङ्गानि त्याज्यानि विद्वद्भिः। तानि लिङ्गानि पूर्णरूपेण परित्यज्य तत् स्थाने नूतनलिङ्गस्य स्थापनं[19] निर्दिष्टम्। पूर्वं विदितमस्ति यत् चतुर्षु वर्णेषु भिन्न-भिन्नलिङ्गानां अर्चनविधानं वर्तते। ब्राह्मणादिभिः अर्चितं लिङ्गमेव उत्कृष्टं वर्तते। चाण्डाल-शूद्राभिः स्पृष्टलिङ्गम् अर्चनयोग्यं न मन्यते।[20] यदि एतादृशं लिङ्गलक्षणं प्राप्यते वा तदा तत्र निर्देशनं कृतं यत्[21]-

---

15. तल्लिङ्गं तु निमग्नं कालज्ञातं तथा वापि।
तदधोगतमित्युक्तं तल्लिङ्गं चोद्धरेत् समितम्॥ मयमतम्, अध्यायः 35, श्लोकः 21
16. मयमतम्, अध्यायः 35, श्लोकः 21
17. मन्त्रक्रयेतरलिङ्गं सर्वेषां लक्षणोपेतम्।
अज्ञस्थापितमेतत्त द्योजयेद् विधिना॥ तत्रैव, श्लोकः 24
18. मयमतम्, अध्यायः 35, श्लोकः 25-26 (डॉ. शैलजा पाण्डेय कृता टीका)
19. अत्रोचित लक्षणं तत् शून्यं तलं तु वा चाक्षम्।
आग्राह्यं क्षेत्रगतं यत्र तद्योग्यं सर्वथा त्याज्यम्॥
तत्रैवान्यलिङ्गं नवमुचितं स्थापयेद् विधिना। मयमतम्, अध्यायः 35, श्लोकः 27

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पूर्वस्यामुत्तरतो नीत्वान्यस्मिन् शुभे देशे।
सुस्थापितञ्च लिङ्गं पूर्ववदेवानाय्य विधिनाऽपि॥

बेरं वाप्येवं तत्तद्युक्त्यान्यस्मिन्नवे देशे।
स्थाप्यं यदि निर्दोषं सर्वमनुक्तं तु तल्लिङ्गे॥

विद्वद्भिः कथितं यद् द्वादशवर्षाधिकं शून्यं (पूजनादिरहितं) लिङ्गमपि अग्राह्यं अथवा पूजनयोग्यं न भवतीति। उक्तं यत्[22]-

द्वादशवर्षादूर्ध्वं शून्यत्वं याति यल्लिङ्गम्।
तत्तन्निर्दोषं यदि न ग्राह्यमिदं वदन्ति केचिज्ज्ञाः॥
शिलामयं तर्ह्युदके निक्षिपेत् त्वरितं बुधः॥

ततः जीर्णोद्धारः कथं भवेदिति सन्दर्भे भग्न-पतित- मूर्तिलिङ्गादीनां जीर्णोद्धार-विधिः शिवमहापुराणे यत्[23]-

अचलां विन्यसेद्गेहे अतिजीर्णां परित्यजेत्॥
व्यङ्गां भग्नां च शीलाढ्यां न्यसेदन्यां च पूर्वत्।
संहारविधिना तत्र तत्त्वान्संहृत्य देशिकः॥

सहस्रं नारसिंहेन हुत्वा तामुद्धरेद्गुरूः।
दारवीं दाहयेद्वह्नौ शैलजां प्रक्षिपेच्चले॥

धातुजां रत्नजां वाऽपि अगाधे वा जलेऽम्बुधौ।
मानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत्॥

वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत्।
यत्प्रमाणा च यद्द्रव्या तन्माना स्थापयेद्दिने॥

प्रतिमादीनां जीर्णोद्धारविषयोपरान्ते लिङ्गादीनां जीर्णोद्धारविधेः वर्णनमपि अग्निपुराणे उपलभ्यते। तस्यानुसारेण लक्ष्मोज्झितमर्थात् लक्षणहीनं, भग्नं, स्थूलं, वज्रहतं तन्त्रमन्त्रादिभिः दूषितं, व्यङ्गं लिङ्गं तस्य पीठिकां वृषं च त्यक्त्वा एवमेव चालितं चलितं निम्नं विषमस्थाने स्थितं दिङ्मूढं, पतितादिकं लिङ्गं

---

20. चाण्डालशूद्रकाद्यैः स्पृष्टं च लिङ्गं तर्हययोग्यकं शस्तम्।
नदीतीरं चेत् स्पृष्टं मन्दिररहितं तु तल्लिङ्गम्॥ मयमतम्, अध्यायः 35, श्लोकः 29
21. तत्रैव, अध्यायः 35, श्लोकः 30-31
22. तत्रैव, अध्यायः 35, श्लोकः 32-33
23. शिवमहापुराण, अध्यायः 67, श्लोकः 1-4

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

परित्यज्य नूतनलिङ्गस्य स्थापना कार्या इति।[24] ततः शिवपूजनं विधाय लिङ्गस्थान्सत्वान् विसर्जनाय सम्प्रार्थ्य नूतनलिङ्गे शम्भुसान्निध्यम् अभिकल्पयेत्। क्रमेऽस्मिन् प्रत्येकभागाय पाशुपतमन्त्रेण सहस्रं हुत्वा शान्तिजलेन प्रोक्षणं करणीयम्। कुशेन लिङ्गं स्पृष्ट्वा पाशुपतमन्त्रस्य जपं करणीयम्। तदोपरान्तं तत्त्वाधिपेभ्यः उत्तरक्रमेणार्घ्यं दत्त्वा शिवस्याष्टमूर्तीनां विसर्जनं करणीयम्। वृषभस्य रज्जुना बन्धनं कृत्वा जले निक्षेपणीयम्। वास्तुदिक्पालयोः शुद्ध्यर्थं शतं होमं कृत्वा आचार्यैः विधिवत्तत्र लिङ्गस्थापनं करणीयम्। असुरमुनितन्त्रविद्भिः प्रतिष्ठितस्य लिङ्गस्य चालनं न करणीयमिति।[25] प्रसङ्गेऽस्मिन् तत्रैव अन्यदूषितलिङ्गानां जीर्णोद्धारविषये निर्देशनं प्राप्यन्ते।[26] प्रसङ्गेऽस्मिन् दीप्तागमे लिङ्गजीर्णोद्धारः[27]-

लिङ्गपीठं परित्यज्य महार्णवे नियोजयेत्।
शिवशक्तिं ततो ग्राह्य बाललिङ्गे नियोजयेत्॥

प्रासादलिङ्गमूले तु पीठलिङ्गस्य वामके।
अस्त्रेणोत्पाटनं कृत्वा चण्डयागं समाचरेत्॥

वृषयागं ततः कृत्वा वृषमन्त्रेण देशिकः।
सौधं भूमौ परित्यज्य दारूजं चाग्निना दहेत्॥

लोहजं तेन कार्यं स्यात्सुदृढं लक्षणान्वितम्।
संप्रोक्ष्य विधिना कार्यं महोत्सवमनन्तरे॥

ग्रन्थेऽस्मिन् विस्तरेण जीर्णोद्धारविधिः निगदितः। अत्र ध्यातव्यं यत् पुराकाले यस्मिन्नगरे ग्रामे वा शिवलिङ्गं न भवति स्म तत्र कथमपि प्रसन्नतासम्पन्नतादिगुणाः न तिष्ठतीति विश्वासः आसीत्। यथोक्तं दीप्तागमे[28]-

ग्रामे वा नगरे वापि अरण्ये पर्वतेऽपि वा।
शिवलिङ्गं विना यत्र तत्र जुष्टं न कारयेत्।
तस्मात्सर्वप्रयत्नेन शिवधामसमन्वितम्॥

परन्तु यदा कालक्षेपत्वात् शिवलिङ्गं जीर्णं भवेत्तदा तस्योद्धारः करणीयः। तत्र शिवलिङ्गमपि नवविधं कथितमस्ति[29]- स्वयम्भुवं पूर्वं दैवतं गाणपत्यम् आसुरं सुरम् आर्षं राक्षसं मानुषञ्चेति। एषु

24. अग्निपुराण अध्याय 103, श्लो. 01-10
25. अग्निपुराण अध्यायः 103, श्लो. 15-20
26. तत्रैव श्लोक.11-15
27. दीप्तागम 59/5
28. दीप्तागम 53/1-3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अष्टलिङ्गानि सुरासुरादिभिः स्थापितानि। एतेषु मानं न विचारणीयम्। केवलं मानुषे लिङ्गे एव मानादिकं विचार्यते। प्रसङ्गेऽस्मिन्प्रासादमण्डने-

घटितेषु विधातव्यमर्च्चा लिङ्गेषु शास्त्रतः।[30]

तुच्छलिङ्गादिविचारः-

वैदिकपौराणिकपरम्परायां लिङ्गार्चन- स्थापन- जीर्णोद्धारादिविषयाणां वर्णनं प्रतिपादितमस्ति। अग्नि-लिङ्गादिपुराणेषु शास्त्रोक्तलिङ्गार्चनादिपद्धत्योः वर्णनं दरीदृश्यते। परन्तु लिङ्गानां प्रभेदक्रमात्तेषां सङ्ख्या अग्निपुराणे अष्टोत्तरशतम्[31] कथितमस्ति। पतिते चेत्स्थापिते लिङ्गेऽस्मिन्नज्ञेन केनापि अन्यत्सूर्यकिरणाभिहतं लिङ्गं स्थापयेत्तत्र। लिङ्गभेदेषु नवप्रकारकाणां लिङ्गानां वर्णनमपि प्राप्यते यथा[32]-

बहुधालिङ्गभेदाश्च नव चौव समासतः।
मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वरः॥

रुद्रोपरि महादेवः प्रणवाख्यः सदाशिवः।
लिङ्गवेदी महादेवी त्रिगुणा त्रिमयाम्बिका॥

तत्र द्रव्यभेदवशात् षड्विधलिङ्गानां वर्णनमप्युपलभ्यते। तथा च प्रभेदवशात् एतेषां सङ्ख्या चत्वारिंशत् मन्यते। प्रोक्तं यथा[33]-

षड्विधं लिंगमित्याहुर्द्रव्याणां च प्रभेदतः।
तेषां भेदाश्चतुर्युक्ता चत्वारिंशदिति स्मृताः॥

शैलजं प्रथमं प्रोक्तं तद्धि साक्षाच्चतुर्विधम्।
द्वितीयं रत्नजं तच्च सप्तधा मुनिसत्तमाः॥

तृतीयं धातुजं लिंगमष्टधा परमेष्ठिनः।
तुरीयं दारुजं लिङ्गं तत्तु षोडशधोच्यते।
मृण्मयं पञ्चमं लिङ्गं द्विधा भिन्नं द्विजोत्तमाः।

---

29. अपराजितपृच्छा पृष्ठ 480
30. प्रासादमण्डनम् अध्याय 08, श्लोक 02
31. अग्निपुराणम्
32. लिङ्गमहापुराणम्, अध्यायः 1, श्लोकः 19-20
33. लिङ्गपुराणम्, अध्यायः 74, श्लोकः 13-18

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

षष्ठं तु क्षणिकं लिङ्गं सप्तधा परिकीर्तितम्॥

श्रीपद रत्नजं लिङ्गं शैलजं सर्वसिद्धिदम्।
मृण्मयं चौव विप्रेन्द्राः सर्वसिद्धिकरं शुभम्।
शैलजं चोत्तमं प्रोक्तं मध्यमं चौव धातुजम्॥

अर्थात् लिङ्गानां द्रव्यभेदवशात् षड्भेदाः (06), चत्वारिंशत् (40) प्रभेदाश्च समुपलभयन्ते। प्रथमं लिङ्गं शैलजम् इति नाम्ना ज्ञायते। अस्य चत्वारः (04) उपविभागाः सन्ति। द्वितीयं रत्नजनितलिङ्गानि भवन्ति एतेषां सप्त (07) उपविभागाः भवन्ति। तृतीयं धातुजानि लिङ्गानि सन्ति एतेषां अष्टौ (08) उपविभागाः प्राप्यन्ते। चतुर्थं काष्ठनिर्मितानि लिङ्गानि भवन्ति एतेषां षोडशोपविभागाः (16) कथिताः। पञ्चमं मृण्मयलिङ्गानि सन्ति एतेषां द्वौ (02) उपविभागौ वर्तेते। षष्ठमं क्षणिकलिङ्गानि वर्णितानि सन्ति येषां सप्तोपविभागाः कथिताः सन्ति। क्रमेऽस्मिन् लिङ्गानां फलमपि प्रतिपादितमस्ति–

लिङ्गस्य प्रकारः		फलम्
1.	रत्नलिङ्गम्	भाग्यदायकम्
2.	शैलजलिङ्गम्	सिद्धिदायकम्
3.	धातुलिङ्गम्	धनदायकम्
4.	मृत्तिकालिङ्गम्	सर्वसिद्धिदायकम्
5.	काष्ठलिङ्गम्	सांसारिकभोगदायकम्

तत्रापि सर्वकामार्थसाधकलिङ्गानि[34]–

लिङ्गं सुरार्चितं धारालिङ्गं साहस्रलिङ्गकम्।
त्रैराशिकं तु सर्वेषां सर्वकामफलप्रदम्॥

लिङ्गेषु सुरार्चितं (देवेश्वर), धारालिङ्गं (धारेश्वर), सहस्रलिङ्गं, त्रैराशिकञ्च लिङ्गानि समेषां कृते सर्वविधकामफलानि यच्छन्ति। क्रमेऽस्मिन् ऋषीणां कृतेऽपि आर्षलिङ्गस्य वर्णनं कृतं यथा[35]–

सस्थूलमूललिङ्गं यवमध्यं वा पिपीलिकामध्यम्।

34. मयमतम्, अध्यायः –33, श्लोकः 80
35. तत्रैव, अध्यायः –33, श्लोकः 85–86

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

लिङ्गं तु शिरः स्थूलं ह्यार्ष लिङ्गं चतुर्भेदम्॥

निजविपुलाष्टांशघ्नं मूले मध्ये तथा तदग्रे च।
विष्ण्वजभागो सम्यक् चतुरस्रं चार्षके लिङ्गे॥

अर्थात् यस्य लिङ्गस्य मूलभागं स्थूलं मूलप्रमाणतः विपरीतं वा भवेत् यवपिपीलिकययोः मध्यमानयोः निर्मितयोः वा भवेत् तद् लिङ्गस्यार्ष संज्ञा भवति। केचन कथयन्ति यत् स्वयम्भुवार्षद्राविडलिङ्गानां किमऽपि प्रमाणं न भवति।[36]

अनेन प्रकारेण लिङ्गानां लक्षणानि वास्तुशास्त्रे विस्तरेण कथितानि सन्ति। परन्तु एतानि लिङ्गानि यदा पतितानि, स्फुटितानि, वक्राणि, अशुद्धादीनि जातानि तदा एतेषां जीर्णोद्धारः करणीयो भवति। तदा कानि लिङ्गानि तुच्छानि? कथमेतेषां जीर्णोद्धारो भवेदिति विषये मयमते कथितमस्ति यत्-

अन्त्येनान्तरितं वा श्वभ्रान्तं नैव सम्प्राप्तम्।
अनभीष्ट मार्गतास्यं तल्लिङ्गं तुच्छमिति कथितम्।
तत्रैव तु तल्लिङ्गं सम्यग्विद्वान् यः समीकुर्यात्।
अन्येऽपि निर्मानं च लिङ्गं तदातव सम्मतम्।
वक्रं च वक्रवृत्तं लिङ्गं यत्तदेव तत्समितम्॥[37]

अर्थात् लिङ्गस्य पतिते सति यदि कश्चिदज्ञपुरुषः तल्लिङ्गं पुनः स्थापयति तदा तत्तुच्छं लिङ्गं जानीयात्। यतोहि शास्त्रविधिरहितस्थापनं तुच्छं ज्ञेयम्। तत्र सूर्यकिरणानभिहतं अन्यलिङ्गं स्थापयेत्। एवमेव अन्त्येन चाण्डालादिभिः अन्तरिते सति अथवा अपवित्रस्थाने अपवित्रवस्तुभिः साकं स्थितं लिङ्गमपि तुच्छलिङ्गं भवति। तथैव गर्तस्थितं पीठस्य खातस्य निम्नतले वा स्थितं लिङ्गमपि तुच्छलिङ्गं भवति। एवमेव अनभीष्टमार्गतास्यमर्थात् यस्य लिङ्गस्य दिशा विहितदिशाविरुद्धाऽस्ति तदपि लिङ्गं तुच्छं ज्ञेयम्। एतादृशानां लिङ्गानामुद्धारः प्राज्ञेन करणीयः। अस्माद्धेतोः शास्त्रविधिपूर्वकं नूतनं लिङ्गं स्थापयेत्। अनभीष्टमार्गतास्यं लिङ्गं प्राज्ञेः समीकुर्यात् अर्थात् विधिपूर्वकं विहितदिशायां तं लिङ्गं स्थापयेत्।

एवमेव वक्रलिङ्गं वक्रवृत्तलिङ्गञ्चापि तुच्छे लिङ्गे। तुच्छलिङ्गम् अपि मानप्रमाणेन संशोध्य स्थापयेदिति। परन्तु अत्र ध्यातव्यं यत् स्वयम्भूदैविकं लिङ्गमासुरलिङ्गादिकं च शिल्पिकर्माप्रयुक्तत्वात् दोषरहिताः भवन्ति। यथोक्तं प्रासादमण्डनेऽपि-

---

36. (टी.ए. गोपीनाथ रावः हिन्दू आईकनोग्राफी, द्वितीय भाग प्रथम खण्ड, पृष्ठ 86) द्रष्टव्य मयमतम्, श्रीकृष्ण-जुगनूसम्पादितं पृष्ठ 369
37. मयमतम्, अध्यायः 35, श्लोकः 19-20

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मानं न्यूनाधिकं वापि स्वयम्भू बाणरत्नजैः।
घटितेषु विधातव्यमर्च्चा लिङ्गेषु शाश्वतः॥[38]

अत्रावधेयं यत्र प्रासादमण्डने तुच्छलिङ्गविषये वर्णनं न प्राप्यते। परन्तु जीर्णोद्धार-परामर्शः तत्रोपलभ्यते-

अथ तच्चालतः प्राज्ञो जीर्णं व्यङ्गं च दूषितम्।
आचार्यः शिल्पिभिः प्राज्ञैः शास्त्रदृष्ट्या समुद्धरेदिति॥[39]

अधोगतादिलिङ्गविचारः

तत्र कालक्रमात् कानिचन लिङ्गानि भूमौ निमग्नानि भवन्ति। एवमेव कानिचन लिङ्गानि जलनिमग्नानि भवन्ति। ततः एतेषां मध्ये कानिचन लिङ्गानि अधोगतलिङ्गानि कानि च ऊर्ध्वगतलिङ्गानि भवन्ति। अस्मिन् सन्दर्भे मयमते निगदितमस्ति यत् - निश्चितकालावधिं यावत् यल्लिङ्गं भूमौ निमग्नं भवति तद् अधोगतलिङ्गमुच्यते। अस्य पुनरुद्धारोऽपि पूर्वविदितप्रक्रियया करणीयम्।

तल्लिङ्गं तु निमग्नं कालज्ञातं तथा वापि।
तदधोगतमित्युक्तं तल्लिङ्गं चोद्धरेत् समितम्॥[40]

अर्थात् तल्लिङ्गं भूमितः निष्कास्य तस्य मानादिकं परीक्ष्य सुयोग्यस्थाने स्थापनीयमिति। एवमेव मयमते ऊर्ध्वगतलिङ्गविषये प्राप्यते यद् अनिश्चितकालं यावत् भूमेरन्तः स्थं लिङ्गं ऊर्ध्वगतलिङ्गं भवति। यस्मिन् स्थानेऽस्य प्राप्तिर्भवति निर्दोषे सति तत्रैवास्य स्थापनं करणीयमिति। यथा[41]-

तल्लिङ्गं तु निमग्नं कालाज्ञातमूर्ध्वगतम्।
तत्र स्थाप्यं पुनरपि निर्दोषकं यदिदम्॥[42]

अस्मिन् क्रमे भविष्यपुराणे शिवलिङ्गस्य चालननिषेधः प्राप्यते तद्यथा -

सुस्थितं दुःस्थितं वापि शिवलिङ्गं न चालयेत्।
चालनाद्रौरवं याति स्वर्गं न च स्वर्गभाक्॥

---

38. प्रासादमण्डनम् अ. 08, 02
39. तत्रैव श्लो. 14
40. मयमतम् अ. 35,श्लोक. 21
41. तत्रैव श्लोक. 22
42. वास्तु उद्धारधोरणी अ. 03, श्लो.12

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

एवमेवाग्निपुराणेऽपि दृश्यते[43]-

चालितञ्चलितं निम्नमत्यर्थं विषमस्थितम्।
दिङ्मूढं पातितं लिङ्गं मध्यस्थं पतितं तथा॥

अत्र प्रासादमण्डने कथितमस्ति[44]-

स्वस्वस्थाने संस्थितं यच्च विप्रवास्तुशिवालयम्।
अचाल्यं सर्वदेशेषु चालिते राष्ट्रविभ्रमः॥

शिवलिङ्गस्थापने निर्देशः

तत्र पतितादिलक्षणयुक्तस्य शिवलिङ्गस्य स्थापना करणीया न वा अथवा कथं करणीया इति विषये मयमते विस्तरेण चर्चा मिलति। तस्यानुसारेण यदि नद्यः स्रोतः लिङ्गं पतितं तर्हि तन्नीत्वा अन्यस्मिन् शतदण्डदूरे दैविकविधिना शुद्धस्थाने तस्य स्थापना कार्या। तद्यथा-

सरितः स्रोतः पतितं नीत्वा शतदण्डमन्यस्मिन्।
स्थाप्यं तद्दैविकविधिना शुद्धे देशे मुखं प्राग्वत्॥[45]

एवमेव सर्वलक्षणोपेतं निर्दोषं लिङ्गं केनचिदज्ञेन मन्त्रक्रियारहितम् अज्ञानतापूर्वकं स्थापितमस्ति तदा तल्लिङ्गं पुनः विधिपूर्वकं स्थापनीयम्-

मन्त्रक्रियेतरलिङ्गं सर्वेषां लक्षणोपेतम्।
अज्ञस्थापितमेतत्तद्योजयेद् विधिना॥[46]

यदि किञ्चिल्लिङ्गं लक्षणहीनं, दग्धं, जीर्णं, स्फुटितं, भग्नं वा दृश्यते परन्तु तस्य लिङ्गस्य पूजनमर्चनमपि च भवति तथापि तत्र तल्लिङ्गं त्यक्त्वा दोषरहितनूतनलिङ्गस्य स्थापना कार्या। अतः कथयति मयः[47]-

हीनं ज्वलनालीढं जीर्णं सस्फोटकं च भग्नं च।
लिङ्गं सार्घ्यं त्यक्त्वा पुनस्तत्स्थापयेन्नवं लिङ्गम्॥

कदाचित् लिङ्गस्थापनाकाले दिङ्मूढत्वात् अज्ञानाद्वा शिवलिङ्गस्योर्ध्वभागं अधोमुखं स्थापितं भवति अथवा विरुद्धदिशि तस्य मुखं स्यात्, विपरीतं वा स्थापना भवेत्तदा तल्लिङ्गं परित्यज्य

43. तत्रैव 03, 13
44. प्रासादमण्डनम् अ. 08, श्लो.05
45. मयमतम् अ. 35, श्लो.23
46. तत्रैव श्लो. 24
47. तत्रैव श्लो. 25

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तत्स्थाने नियमपूर्वकं नूतनलिङ्गं स्थापयेत्। यथा[48]-

अधरोत्तरमज्ञानां मोहेन वाऽप्यन्यदाननयुक्तम्।

विपरीतं त्यजेत्सहसा उचितं यन्नवमन्यत्तत्रैव स्थापयेद्विधिना॥

एवमेव लिङ्गस्थापने अन्यदोषा अपि भवन्ति। तद् विषये मयमते कथितं यत्-

अत्रोचितलक्षणं तत् शून्यं तलं तु वा चाक्षम्।
अग्राह्यं क्षेत्रगतं यन्न तद्योग्यं सर्वथा त्याज्यम्॥

तत्रैवान्यलिङ्गं नवमुचितं स्थापयेद् विधिना।
चोरादुद्धृतकं तदन्तः पतितं चेत्पञ्चसन्धानम्।
तत्र तदेव स्थाप्यं निर्दोषे पूर्ववद् विधिना॥[49]

अर्थात् सर्वलक्षणोपेतमपि यदि लिङ्गं शून्यतलं अक्षयुतं वा स्यात् (अर्थात् उचिताकृतिहीनं स्यात् अथवा त्याज्यक्षेत्रे स्थितं स्यात्तदाऽपि तत् लिङ्गं स्थापनयोग्यं न भवति। तस्य लिङ्गस्य च परित्यागः करणीयः। तत्स्थाने नूतनलिङ्गं स्थापयेत्। यदि किमपि लिङ्गं चोरात् चोरितं, तत्तु पञ्चसन्धानान्तर्गतं पतितं तदा यदि लिङ्गं निर्दोषमस्ति तर्हि तत्रैव विधिना स्थाप्यम्। एवमेव चाण्डालशूद्रादिभिः स्पृष्टं लिङ्गं पूजनयोग्यं न भवति। यदि नदीतटे मन्दिररहितं लिङ्गं दृश्यते तदा तस्मात् स्थानात् पूर्वदिशि उत्तरदिशि वा नीत्वा शुभे स्थाने विधिपूर्वकं स्थाप्यम्। यथोपलभ्यते-

चण्डालशूद्रकाद्यैः स्पृष्टं च लिङ्गं तर्ह्ययोग्यकं शस्तम्।
नदीतीरं चेत् स्पृष्टं मन्दिररहितं तु लिङ्गम्।
पूर्वस्यामुत्तरतो नीत्वान्यस्मिन् शुभे देशे।
सुस्थापितञ्च लिङ्गं पूर्ववदेवानाय्य विधिनाऽपि॥
बेरं वाप्येवं तत्तद्युक्त्यान्यस्मिन्नवे देशे।
स्थाप्यं यदि निर्दोषं सर्वमनुक्तं तु तल्लिङ्गे॥[50]

अत्र स्थापनसमये ध्यातव्यं यद् यदि किञ्चिल्लिङ्गं द्वादशवर्षाधिकं पूजार्चना-रहितमस्ति तदा निर्दोषे सत्यपि तल्लिङ्गं त्यजेत्। यथा-

द्वादशवर्षादूर्ध्वं शून्यत्वं याति यल्लिङ्गम्।
तत्तन्निर्दोषं यदि नाग्राह्यमिदं वदन्ति केचिज्ज्ञाः॥

48. तत्रैव श्लो. 26
49. तत्रैव श्लो. 27-28
50. तत्रैव श्लो. 29-31

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शिलामयं तर्ह्युदके निक्षिपेत् त्वरितं बुधः।[51]

अनेन प्रकारेण शिवलिङ्गस्थापना कार्या। अत्र प्रसङ्गवशाद् शिवलिङ्गप्रतिष्ठा-कालः विचार्यते। सामान्यदेवप्रतिष्ठामुहूर्तातिरिच्य श्रावणमासेऽपि शिवलिङ्गप्रतिष्ठा शुभा भवति। यथोक्तम्- श्रावणे स्थापयेल्लिङ्गमिति[52]। अत्र स्पष्टार्थं स्थापनामुहूर्त्तसारिणीं प्रस्तूयते-

अयनम्	उत्तरायणम्
चान्द्रमासः	पौषः, माघः, फाल्गुनः, चैत्रः, वैशाखः, ज्येष्ठः
पक्षः	शुक्लः
तिथिः	1,2,3,5,6,7,10,11,13 एवं 15
नक्षत्रम्	रोहिणी, मृगशिरा, आर्द्रा, पुनर्वसुः, रेवती, पुष्यः, अनुराधा, श्रवणः, मूलम्, स्वाती, अश्विनी, चित्रा, मघा, उत्तरभाद्रपदा, उत्तराषाढा, उत्तराफाल्गुनी
वारः	सोमः, गुरुः, शुक्रः, बुधः
लग्नराशिः	वृषः, मिथुनः, सिंहः, कन्या, वृश्चिकः, कुम्भः, मीनः
उदयास्तविचारः	सोमबुधगुरुशुक्राणामुदयकालः
लग्नशुद्धिः	लग्नात् त्रिषडायेषु (3,6.11) सूर्यशनिभौमचन्द्रः शुभाः, अष्टमस्थानं ग्रहवर्जितं, षड्सप्तदशमस्थानानि (6,7,10) विहाय शुक्रः शुभः
योगायोगविचारः	➢ उत्तराषाढानक्षत्रं सोमवासरे शुभम् ➢ हस्ताश्विनीनक्षत्रे भौमवासरे विवर्जिते ➢ मृगशिरार्द्र्युत्तरानक्षत्राणि बुधवासरेण सह वर्जनीयानि ➢ श्रवणपुष्यनक्षत्रे शुक्रवासरेण सह विवर्जिते

51. तत्रैव 32-32
52. बृहद्वास्तुमाला

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

	➢ बुधवासरे द्वितीयातिथिः, गुरुवासरे षष्ठीतिथिः, एकादश्यां चन्द्रवासरः अशुभः ➢ सप्तम्यां तिथौ रेवतीनक्षत्रं प्रजाहानिं करोति। ➢ अन्धसंज्ञकनक्षत्राणि नपुंसकनक्षत्राणि च स्थापनकर्मणि वर्जनीयानि। ➢ धूलिवर्षणे, रक्तवर्षणे, मेघगर्जनसमये, उल्कापाते, दिग्दाहे, सूर्यचन्द्रयोः ग्रहणसमये, षडशीतिमुख-सङ्क्रान्तिकाले स्थापनकर्म न करणीयमिति।
विशेषः –	➢ होराद्रेष्काणनवांशादिवर्गेषु शुभग्रहाणां राशिः ग्रहणीयः

बालतरुणलिङ्गादिविमर्शः

शिवलिङ्गोद्धारकाले बालस्थापनस्य विधान[53] वर्तते। अत्रावधेयं यत् मूलशिवलिङ्गस्य शिवालयस्योद्धारकाले चालनं न करणीयम्। यतोहि उक्तमस्ति प्रासादमण्डने-

स्वस्थाने संस्थितं यच्च विप्रवास्तुशिवालयम्।
अचाल्यं सर्वदेशेषु चालिते राष्ट्रविभ्रमः।।[54]

अतः जीर्णोद्धारकाले शिवस्य पूजार्थं बालालये बाललिङ्गस्य उत वा तरुणालये तरुणलिङ्गस्य स्थापना क्रियते। तत्र अल्पावधिकपूजार्थं बाललिङ्गस्य स्थापना भवति। परन्तु दीर्घकालपर्यन्तं यस्य शिवालयस्योद्धारं सम्भाव्यते तत्र तरुणालये तरुणलिङ्गस्य स्थापनां क्रियते। परन्तु तरुणलिङ्गस्य पूजा अधिकाधिकं द्वादशवर्षपर्यन्तमेव भवति। तदधिके दोषावहो भवति। यथोक्तं मयमते-

यावत्संप्रार्थितार्थं तदुदयसमये मूलहर्म्यं प्रकल्प्य
तस्मिन्नुक्त्वा विधेयं सकलमपि वरं स्थापयेद् बालधाम्नि।
द्विः षट्संवत्सरान्तं तरुणभवनकं तद्वरं नेष्टमाद्यै-
रन्येषां कर्मणां स्यात्तदवधिरधिकं सर्वदोषप्रदं तत्।।[55]

---

53. आद्यारम्भे जीर्णभिन्ने हीनाङ्गानांकल्पते पातने च।
54. लिङ्गे बेरे स्फोटनाद्यङ्गहीने कुर्याद्बालस्थापनं पीठबन्धे।। मयमतम् अ. 35, श्लो.48
55. प्रासादमण्डनम् अ. 08, श्लो. 05

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तत्र मूलस्थानस्येशानोत्तरपूर्वयाम्यदिक्षु अपि बालस्थापनं[56] कर्तुं शक्यते। बालस्थापननिमित्तार्थं मूलस्थानतः चतुर्हस्तमानप्रमाणेनोत्तरदिशि बालस्थापनं करणीयम्। यथा मिलति मयमते[57]-

लयशशीलयपीठकरं चतुः त्रिचतुरंशकलाक्षरं तु वा।
गुणयुगेन्द्रियषण्मुनिहस्तकैः प्रवरमध्यमके तरुणालयम्॥

बालस्थापनादिविषये द्रव्यादिनिर्देशः

तरुणालयनिर्माणाय पाषाणलोहकाष्ठानां प्रयोगः क्रियते, परञ्च बालस्थापनाय सरल-कालज-चन्दन-सालक- खदिर- मारुद-पीपल-तिन्दुकादीनां काष्ठानां प्रयोगो भवति। यथा[58]-

उपलोहकुजे तरुणालयेष्वभिहितास्तरवोऽपि च बालके।
सरलकालजचन्दनसालका खदिरमारुदपिप्पलतिन्दुकाः॥

इदमेव द्रव्यं लिङ्गादिनिर्माणेऽपि प्रयोज्यं भवति।

बालतरुणयोः लिङ्गप्रमाणम्

बाललिङ्गस्योदयमानम् अर्थात् बाललिङ्गस्योच्छ्रितिः तद्गर्भस्योच्छ्रायमानस्यार्धं श्रेष्ठं भवति। गर्भस्योच्छ्रायमानस्य चतुर्थांशमानं यदि बाललिङ्गस्य स्यात्तदा अधममानमस्ति। अनयोः श्रेष्ठहीनयोः मध्ये यदन्तरं तस्मिन् अष्टभिर्भक्तं सति यन्मानं प्राप्यते तत्क्रमेण वारम्वारं अधममाने योजनेन अन्यमानानि प्राप्यन्ते। अनेन प्रकारेण अधममानतः श्रेष्ठमानपर्यन्तं बाललिङ्गस्य नवविधमानानि प्राप्यन्ते। यथा कल्प्यते-

गर्भगृहस्योच्छ्रायमानम् = 32 हस्तमितम्

तदा 32 ÷ 2 = 16 श्रेष्ठमानम्

एवमेव 32 ÷ 4 = 8 अधममानम्

ततः श्रेष्ठाधमयोरन्तरम् = 16 - 8 = 8

अस्य अष्टमांशः यदा क्रियते तदा 8 ÷ 8 = 1 हस्तमानम्

ततः प्राप्तमानम् अधममाने उत्तरोत्तरं योजनेन-

---

56. मयमतम् अ. 35, श्लो. 58
57. उद्धृतं मयमतं श्री कृष्णजुगनू सम्पादितम् पृष्ठ 418
58. तत्रैव श्लो. 49

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

1.	8		अधममानम्		
2.	8	+	1	=	9
3.	9	+	1	=	10
4.	10	+	1	=	11
5.	11	+	1	=	12
6.	12	+	1	=	13
7.	13	+	1	=	14
8.	14	+	1	=	15
9.	15	+	1	=	16

अनेन प्रकारेण अधममानतः श्रेष्ठमानपर्यन्तं बाणलिङ्गस्य नवविधमानानि जातानि। बाललिङ्गस्योच्छ्रायमनुसृत्यैव तत्परिधिः निर्मातव्या।[59]

तत्र तरुणलिङ्गस्यापि नवविधमानानि प्राप्यन्ते। पञ्चदशाङ्गुलमितम् अधममानं ततः क्रमशः16, 17, 18, 19, 20, 21, 22, 23 अङ्गुलपर्यन्तं नवविधमानानि सन्ति। मानमिदं तरुणलिङ्गस्य भूमेरन्तःस्थे तरुणलिङ्गसमुन्नत्यर्थं वर्तते। यथा[60]–

तिथिकराग्रजमादितयाङ्गुलाङ्गुलिविवर्धनया नवमानकम्।
तरुणलिङ्गसमुन्नतकर्तृवद् गुणयुगांशकमासनिवेशनम्।।[61]

तरुणलिङ्गस्योच्छ्रायमानं मूलप्रासादस्य मूलतलस्य सममपि भवितुं शक्यते। परञ्च तद्हीनं यदि भवेद् तदा तस्यार्धमानस्य प्रमाणतः हीनं न स्यात्। उक्तद्वयोः मानयोरन्तरं यदि अष्टभिः विभक्तं क्रियते तदा नवविधयोदयमानानि प्राप्तानि भवन्ति। यथोक्तं मयमते–

भवति मूलतलेतरतुङ्गकं सममुतार्धकमुत्तममाधमम्।
नवविधं वसुभागयुतेन्तरे तरुणलिङ्गसमुन्नतमीरितम्।।[62]

अनेन प्रकारेण जीर्णादिशिवलिङ्गानां विधिपूर्वकं न्यासेन कर्त्ता सुखादिकं प्राप्नोतीति।

59. तत्रैव अ.35, श्लो. 57
60. तत्रैव श्लो.51
61. तत्रैव श्लो.52
62. तत्रैव श्लो.53

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ग्रामविन्यासः

श्रीगणेशदत्तचतुर्वेदी

मयमतानुसारेण वसति विन्यासः पञ्चधा भवति ग्राम-खेट-खर्वट-दुर्ग-नगराणि च, एतेषां दण्डप्रमाणेन त्रयो भेदाः भवन्ति। हीनग्रामस्य (कनिष्ठग्रामस्य) मानं चतुरधिकषष्ठिदण्डतुल्यं भवति। मध्यमग्रामस्य मानं तस्य द्विगुणं (128 दण्डपरिमितं भवति) उत्तमग्रामस्य मानं त्रिगुणं अर्थात् (164×3=1929) दण्डतुल्यं भवति। यथा-

ग्रामः खेटः खर्वटमथ दुर्गं नगरमितिः च पञ्चविधम्।
दण्डैस्तेषां मानं वक्ष्येऽहं त्रि-त्रिभेदभिन्नानाम्॥
चतुरधिकषष्टिदण्डो ग्रामः स्याद्धीनहीनमिति कथितः।
ग्रामस्य मध्यमस्य द्विगुणं त्रिगुणं तथोत्तमं प्रोक्तम्॥[1]

अङ्गुलादिमानलक्षणम्

तादृशं ब्रीहित्रयदैर्घ्यवन्मानमङ्गुलमिति कथ्यते।

अङ्गुलद्वादशकस्य वितस्ति कथ्यते। वितस्ति द्वयस्य हस्तमानमिति कथ्यते। हस्तद्वयस्य धनुर्मुष्टिरिति ज्ञायते। धनुर्मुष्टिद्वयस्य दण्ड इति नाम। तादृशं दण्डद्वयं नृपदण्डमिति भवति। तादृशनृपदण्डद्वयस्य ब्रह्मदण्ड इति नामेव प्रसिद्धमस्ति। एतादृशं मानं वास्तुशास्त्रेषु शिल्पशास्त्रेषु च वास्तुशास्त्रस्य विद्वद्भिः कथितम्।[3] समराङ्गणसूत्रधारे मानप्रमाणं भिन्नरूपेण कथितम्[4] यथा-

8 अणुः = 1 रजकणः, वालाग्रः = 1 लिक्षा, यूका = 1 यवः, 24 अङ्गुलम् = 1 हस्तः (1.5)8 रजकणः = 1 वालाग्रः लिक्षा = 1 यूकाः 8 यवः = 1 अङ्गुलः (1.875 से. मी.) 4 हस्तः = 1 दण्डम् (6 फीटमितम्)

समराङ्गणसूत्रधारे त्रिविधं हस्तप्रमाणं कथितम्[5] - (1) उत्तमहस्तप्रमाणम् (2) मध्यमहस्तप्रमाणम् (3) अधमहस्तप्रमाणञ्च। अष्टावङ्गुलप्रमाणात्मकहस्तस्य संज्ञा "प्रायशः"। अयमेव उत्तमहस्तः।

---

1. मयमतम् 9/10-10
3. विश्वकर्मावास्तुशास्त्र 7/74-77
4. समराङ्गणसूत्रधार 9/4-5
5. तत्रैव 9/2-3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मध्यमस्य सप्ताङ्गुलप्रमाणात्मकहस्तस्य 'साधारणः' इति संज्ञाऽस्ति। षडङ्गुलप्रमाणात्मकहस्तस्य 'शयः' संज्ञास्ति। अयमेव अधमहस्तः।

अनेन प्रकारेण आचार्येण हस्तस्य भेदत्रयं कथितम्।[6] ग्रामपुरनगरादिनिवेशे उत्तमहस्तमानस्य प्रयोगः गृह्यते। यथा[7]–

विश्वकर्मावास्तुशास्त्रे कथितं यत् ग्रामपुरनगरादीनां चतुष्पथवीथी–वलभी–चत्वर–मनुजभवन–विपणि–निषद्या–मार्गशाला–सस्य–भूमीनाञ्च मापनं दण्डेन नृपदण्डेन वा क्रियते। तथैव ग्राम–गिरि–दुर्ग–वन–नदी–तटाक–नृपप्रासाद–राजभवन–शुद्धान्तादिभवनानामपि मापनं नृपदण्डेन देवभवनानां च मापनं ब्रह्मदण्डेन क्रियते।[8]

मयमतानुसारेण ग्रामस्य मानम्–

दण्डानां पञ्चशतं कोशं तद्द्विगुणमर्धगव्यूतम्।
गव्यूतं तद्द्विगुणं ह्यष्टसहस्रं तु योजनं विद्यात्॥

अष्टधनुश्चतुरस्रा काकणिका तच्चतुर्गुणं माषम्।
मासचतुर्वर्तनकं तत्पञ्चगुणं वाटिका कथिता।
वाटिकाया युगगुणिता ग्रामकुटुम्बावनिः श्रेष्ठाः॥[9]

पञ्चशत्दण्डानां कोशं भवति। तद्द्विगुणं (क्रोशस्य द्विगुणं) अर्धगव्यूतं मन्यते। अर्धगव्यूतस्य द्विगुणं गव्यूतं मन्यते। अष्टसहस्रदण्डानां योजनं भवति। अष्टघनो चतुरस्र मापं काकणिका भवति। काकणिकायाः चतुर्गुणं माषं भवति। माषस्य चतुर्गुणं वर्तनकं, तस्य पञ्चगुणं वाटिकासंज्ञकं मानं भवति। वाटिकायाः चतुर्गुणं ग्रामस्य एकपरिवारस्य विन्यासाय श्रेष्ठं मानं भवति।

मयमतानुसारेण मानस्य स्पष्टार्थचक्रम्–

---

6. तत्रैव 9/28–30
7. समराङ्गणसूत्रधार 9/31–33
8. विश्वकर्मावास्तुशास्त्र 7/80–84
9. मयमतम् 9/1–3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

500 दण्डाः = 1 क्रोशम्	2 क्रोशं = 1 अर्धगव्यूतः
2 अर्धगव्यूतौ = गव्यूतः	8000 दण्डः = 1 योजनम्
8 धनुः = चतुर्भजाकारकाकणिका	4 काकणिकाः = 1 माषः
4 माषः = 1 वर्तनकः	5 वर्तनकः = 1 वाटिका
4 वाटिका = ग्रामे कुटुम्बस्य विन्यासाय श्रेष्ठं भूखण्डं भवति	

ग्रामस्य मानम्

ग्रामस्य शतसहस्रैर्दण्डैः पर्यन्तमानमिदमुक्तम्।[10]

उत्तमग्रामस्य मानं शतसहस्रदण्डपरिमितं कथितम्। विंशतिसहस्रदण्डात् प्रारभ्य समसंख्यायां वृद्ध्या ग्रामस्य पञ्चविधमानं भवति। कनिष्ठ (हीन) ग्रामस्य मानं पञ्चाशद्दण्डपरिमितं भवति। पञ्चशतदण्डवृद्ध्या विंशतिसहस्रदण्डपरिमितं एकस्य कनिष्ठग्रामस्य मानं भवति।[11] अनेन प्रकारेण ग्रामस्य चत्वारिंशद् भेदाः भवन्ति। इदं ग्रामस्य मानमस्ति। ग्रामस्य दैर्घ्यं द्विसहस्रदण्डपरिमितं, सहस्रदण्डतुल्यं पञ्चशतदण्डपरिमितं च भवति ग्रामस्य विस्तारः दण्डात् नवशतं, सप्तशतं, पञ्चशतं, त्रिशतं भवति। नगरस्य विस्तारः सहस्रदण्डात् प्रारभ्य द्विसहस्रदण्डपर्यन्तं भवति। वसति विन्यासः पञ्चविधं भवति।[12] ग्राम-खेट-खर्वट-दुर्ग-नगराणि च पञ्चवसति विन्यासानि। प्रत्येकस्य भेदत्रयं भवति।[13]

ग्रामस्य मानम्

हीनग्रामस्य मानं 64 दण्डपरिमितं, मध्यमग्रामस्य मानं तस्य द्विगुणं 64×2=128 दण्ड-परिमितम्, उत्तमग्रामस्य मानं तस्य त्रिगुणं (64×3=192 दण्डपरिमितम्) भवति।[14]

खेटस्य मानम्

हीनखेटस्य मानं 256 दण्डपरिमितं, मध्यमखेटस्य मानं 320 दण्डपरिमितं तथा उत्तमखेटस्य मानं 384 दण्डपरिमितं भवति।[15]

10. मयमतम् 9/4
11. मयमतम् 9/5-6
12. मयमतम् 9/7-8
13. मयमतम् 9/9-10
14. मयमतम् 9/11
15. मयमतम् 9/12

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

खर्वटस्य मानम्

कनिष्ठखर्वटस्य मानं 448 दण्डपरिमितं मध्यमखर्वटस्य मानं पञ्चशतोत्तरद्वादश (512) दण्डपरिमितम्। उत्तमखर्वटस्य मानं 576 दण्डपरिमितं भवति।[16]

दुर्गस्य मानम्

कनिष्ठदुर्गस्य मानं 832 दण्डपरिमितं मध्यमदुर्गस्य मानं 704 दण्डपरिमित्तमुत्तमदुर्गस्य च मानं 768 दण्डपरिमितं भवति।[17]

नगरस्य मानम्

कनिष्ठनगरस्य मानं 832 दण्डपरिमितं, मध्यमनगरस्य मानं 896 दण्डपरिमितं तथा च उत्तमनगरस्य मानं 906 दण्डपरिमितं भवति।[18] षोडशदण्डवृद्ध्या प्रत्येकस्य नवभेदाः भवन्ति।

दानवराजमयेन ग्रामस्य अष्टभेदाः कथिताः-

दण्डकमपरं स्वस्तिकमितं उर्ध्वं प्रस्तारं चैव।
पश्चात् प्रकीर्णकं स्यान्नन्द्यावर्तं परागमथ पद्यम्॥
स्याच्छ्रीप्रतिष्ठितेनैवाष्टविधं ग्रामुदिष्टम्॥[20]

(1) दण्डकः (2) स्वस्तिकः (3) प्रस्तरः (4) प्रकीर्णकः (5) नन्द्यावर्तः (6) परागः (7) पद्यः (8) श्रीप्रतिष्ठितः।

विश्वकर्मवास्तुशास्त्रे द्वादशभेदाः कथिता। यथा-

आद्यस्तु मण्डकग्रामः प्रस्तरस्तदन्तरम्।
बाहुलीकस्तृतीयस्तु पराकस्तु चतुर्थकः॥

चतुर्मुखः पञ्चमः स्यात् षष्ठः पूर्वमुखस्तथा।
सप्तमो मङ्गलग्रामस्तष्टमो विश्वकर्मकः॥

नवमो देवराडग्रामो विश्वेशो दशमो मतः।
एकादशस्तु कैलासो द्वादशो नित्यमङ्गलः॥

---

16. मयमतम् 9/13
17. मयमतम् 9/14
18. मयमतम् 9/15
20. मयमतम् 9/33-34

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इत्येवं द्वादशग्रामाः शिल्पशास्त्रे प्रकीर्तिताः।[21]

आद्यो मण्डकग्रामः। द्वितीयः प्रस्तरग्रामः। तृतीयो बाहुलिकग्रामः। चतुर्थः पराकग्रामः। पञ्चमश्चतुर्मुखग्रामः। षष्ठः पूर्वमुखग्रामः। सप्तमो मङ्गलग्रामः। अष्टमो विश्वकर्मग्रामः। नवमो देवेशग्रामः। दशमो विश्वेशग्रामः। एकादशः कैलासग्रामः। द्वादशो नित्यमङ्गलग्रामः। अनेन वास्तुशास्त्रे (शिल्पशास्त्रे) द्वादशविधग्रामाः कथिताः।

आचार्यामानानुसारेण ग्रामस्याष्टभेदाः सन्ति-

दण्डकं सर्वतोभद्रं नद्यावर्तं तु पद्मकम्।
स्वस्तिकं प्रस्तरं चैव कार्मुकं च चतुर्मुखम्।
एवं चाष्टविधं ग्रामं तत्तद्रूपेण संज्ञितम्।।[34]

दण्डक-सर्वतोभद्र-नन्द्यावर्त-पद्मक-स्वस्तिक-प्रस्तरकामुकचतुर्मुखा एते अष्टग्रामाः सन्ति। सर्वेषां ग्रामाणां मानदृष्ट्या अनेकभेदाः भवन्ति। प्रथमदण्डकग्रामस्य त्रयः भेदाः सन्ति। क्षुद्रदण्डकः, मध्यमदण्डकः उत्तमदण्डकश्च।

क्षुद्रकदण्डकस्य नवत्रिंशद्भेदाः सन्ति। अस्य दैर्घ्यं पञ्चविंशतिदण्डात् प्रारभ्य द्वि-द्विदण्ड-वृद्ध्या एकाधिकशतदण्डपर्यन्तं नवत्रिंशद्भेदाः भवन्ति।[35]

मध्यमदण्डकग्रामस्य दैर्घ्यं एकत्रिंशत्दण्डात् प्रारभ्य 107 दण्डपर्यन्तं द्वि-द्विदण्डवृद्धयसप्तषष्ठि (67) भेदाः भवन्ति।[36]

उत्तमदण्डकग्रामस्य दर्घ्यं सप्तत्रिंशद्दण्डात् प्रारभ्य द्वि-द्विदण्ड-वृद्ध्या पञ्चचत्वारिंशद् भेदाः भवन्ति। अयन्तु ब्राह्मणानां निवासायोपयुक्तो वर्तते-

एतत्तु दण्डकं प्रोक्तं भूसुराणां तु योग्यकम्।[37]

शिल्परत्ने ग्रामस्य अष्टभेदाः कथिताः-

दण्डकः स्वस्तिकश्चैव प्रस्तरश्च प्रकीर्णकः।
नन्द्यावर्तः परागश्च पद्मकः अप्रतिष्ठितः।

---

21. विश्वकर्मवास्तुशास्त्र 7/6-9
34. मानसार भाग-3, 9/1-2
35. मानसार 9/5-7
36. तत्रैव 9/8-9
37. तत्रैव 9/11

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ग्रामादीनां तु सामान्यं विन्यासत्वष्टधा स्मृतः।।[38]

ग्रामविन्यासे वासविचारः

गृहे, नगरे (पुरे), ग्रामे, वेश्मनि सर्वत्र च देवानां स्थानानि परिकल्पितानि। यथा गृहे वास्तुनरस्य परिकल्पना कृता तथैव नगरे ग्रामे च कार्या। तत्रापि च यानि मर्माणि तानि प्राग्वच्चिन्तनीयानि। तेषु नगर-ग्रामेषु ब्राह्मणाद्या-वर्णा (ब्राह्मणक्षत्रियवैश्यशूद्रा) यथाक्रमं कल्पनीयाः। यत्र दिग्भागे यस्योचितं तत्र वासयेदित्यर्थः।

ग्रामे नगरे वा ब्राह्मणानामुत्तरस्यां दिशि वासगृहाणि[39] कार्याणि, पूर्वस्यां क्षत्रियाणाम्, दक्षिणस्याम् वैश्यानां, पश्चिमायां शूद्राणामिति। यथा प्राङ्मुखस्य गृहास्यद्वारमुत्तराभिमुखं कार्यम् दक्षिणभिमुखस्य प्राङ्मुखम्, पश्चिमाभिमुखस्य दक्षिणाभिमुख उत्तराभिमुखस्य पश्चिमाभिमुखमिति।[40]

उत्तमादिग्रामे ब्राह्मणानां संख्या- यस्मिन् ग्रामे ब्राह्मणानां द्वादशसहस्रसंख्यास्ति स ग्रामः श्रेष्ठः कथ्यते। मध्यमग्रामे दशसहस्रं तथा च कनिष्ठग्रामे अष्टसहस्रसंख्या भवति। मध्यमोत्तमे ग्रामे ब्राह्मणानां संख्या सप्तसहस्रं भवति मध्यमस्य मध्यमग्रामे षट्सहस्रं तथा मध्यमस्य अधमग्रामे पञ्चसहस्रसंख्या वर्तते। अधोत्तमग्रामे ब्राह्मणानां संख्या चतुःसहस्रं, अधोसमं ग्रामे त्रिसहस्रं तथा अध माधमग्रामे एकसहस्रं संख्या भवति। नीचोत्तमग्रामे ब्राह्मणानां सहस्रसंख्या भवति। नीचमध्यमग्रामे सप्तशतं तथा नीचाल्पग्रामे ब्राह्मणानां संख्या पञ्चशतं भवति। ब्राह्मणानां वासदृष्ट्या क्षुद्रकग्रामस्य दशभेदाः सन्ति। एषु ग्रामेषु यथाक्रमेण ब्राह्मणानां संख्या 800, 1600, 2400, 84, 64, 50, 32, 24, 16, 12 भवति एवंविधक्षुद्रग्रामस्य भेदाः सन्ति।[41] यस्मिन् ग्रामे ब्राह्मणस्य एकपरिवारो वसति स ग्रामः कुटिकसंज्ञकनामकग्रामः वा एकभोगनामक ग्रामः कथ्यते।

ग्रामस्य दक्षिणभागे गोशाला तथोत्तरभागे पुष्पवाटिका तथा पूर्व-पश्चिमद्वारसमीपे तापसानां वासः कार्यः। जलाशय-वापी-कूपाश्च ग्रामस्य सर्वत्रभागेषु कार्या, वैश्यानां वासः दक्षिणदिशि तथा शूद्राणां ग्रामस्य परितः कुर्यात्। पूर्वोत्तरदिशायां (दिशि) कुलालानां नापितानां तथा अन्यत्कर्मोपयुक्तानां वासः कल्पनीयः।

मत्स्योपजीविनां (मछुआरा) वासः ग्रामस्य वायव्यदिशि भवेत् तथा च पश्चिमदिशि मांसैः उपजीविनां निवासः कल्पनीयः। तैलोपजीत्रिनां (तेलियो) वासः ग्रामस्य उत्तरदिशि चिन्तनीयः।[42]

---

38. शिल्प
39. बृ. सं. 53/67
40. बृ. सं. 53/68
41. मयमतम् 9/25-30
42. तत्रैव 9/87-91

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ग्रामेषु गृहस्य लक्षणम्

ग्रामेषु गृहस्य दैर्घ्यं त्रि, पञ्च, सप्त तथा नवधनुप्रमाणतुल्यं भवति। गृहस्य विस्तारः दैर्घ्यात् क्रमशः द्वि-द्वि दण्डं वर्धयेत् यावत् द्विगुणावधिकं न भवति।[44]

ग्रामात् किञ्चिद्दूरं आग्नेयकोणे अथवा वायव्यकोणे स्थपतीनां निवासः कार्यः। शेषाणामपि तत्र कर्तव्यम्। तस्मात् किञ्चिद्दूरे रजकस्य निवासः कुर्यात्। ग्रामस्य क्रोशमात्रदूरे पूर्वदिशि चाण्डालस्य निवासं कुर्यात्। ग्रामस्य पूर्वोत्तरदिशि पञ्चशद् दण्डैः दूरं श्मशानस्थलं (अन्त्येष्टिक्रियास्थानम्) स्थापयेत्।[45]

गृह-ग्राम-पुराणां चतुर्षु कोणेषु ऐशान्यां चरकी, आग्नेयां विदारि, नैर्ऋते पूतना, वायव्ये राक्षसी च निवसन्ति। अतः एषु कोणेषु सामान्यजनानां निवासे दोषाः भवन्ति परन्तु एषु कोणेषु श्वपचादयः अन्त्यज-चर्मकार-प्रभृतयः वृद्धिमाप्नुवन्ति।[46]

ग्रामेषु वीथिविधानम्

सर्वेषां ग्रामाणां बहिः अन्तश्च मङ्गलवीथ्यावृताः ग्रामस्य मध्यभागे (ब्रह्मस्थाने) देवालयं अथवा पीठं (चबूतरा) स्थापयेत्। मार्गस्य दैर्घ्यं एक, द्वि, त्रि, चतुर्भिः, पञ्चभिः कार्मुकं (धनुपरिमितं) भवति। ग्रामस्य मध्यवीथी ब्राह्मवीथी कथ्यते। सैव ग्रामस्य नाभिरूपेण ज्ञायते।[47]

ग्रामावृता वीथी मङ्गलवीथिसंज्ञकं तथा पुरावृता वीथी जनवीथिसंज्ञकं भवति। द्वयोः वीथ्योः संज्ञा रथ्यावीथी प्राचीनाचार्यैः कथिता।[48]

ग्रामेषु द्वाराणि

ग्रामस्य द्वारं भल्लाट-महेन्द्र-राक्षस-पुष्पदन्तपदेषु स्थापयेत्-तत्र चत्वारः जलमार्गा अपि भवन्ति। जलमार्गस्य वास्तुपदानि वितथ-जयन्ताः सुग्रीवः मुख्याः एते चत्वारः सन्ति। तथा भृशाः-पूषा, भृङ्गराज-दौवारिक-शोष-नागादिव्यादीनां पदषु उपद्वारं भवति। एतेषां वास्तु उपद्वाराणां विस्तारः त्रि, पञ्च, सप्त-हस्त प्रमाणेन भवति। एतेषां उपद्वाराणां यो विस्तारः तस्माद् द्विगुणं, सार्द्धगुणं, वाङ्ग्रिहीनं उच्छ्रेयं भवति। सर्वेषां ग्रामन् परितः परिखाः (खाई) सुरक्षादृष्ट्या निर्मातव्यं तथा वप्र अपि निर्मेयुः।[49]

---

44. मयमतम् 9/91-92
45. तत्रैव 9/91-92,95-98
46. बृ. सं. 53/81-82
48. तत्रैव 9/39
49. मयमतम् 9/57-60

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नद्याः दक्षिणभागे ग्रामस्य विन्यासः प्रशस्तो वर्तते। एकाशीतिपदवास्तुविन्यासे तथा च चतुःषष्ठिपदविन्यासे ग्रामस्य मध्यभागः ब्रह्मक्षेत्रं, ततः परं दैवक्षेत्रं कथ्यते। तत्पश्चात् मानुष एवं पैशाचक्षेत्रस्य सङ्कल्पं कुर्यात्। दैवं मानुषक्षेत्रे ब्राह्मणः निवासं कुर्यात् तथा च कर्मोपजीविनां गृहस्य निर्माणं पैशाचक्षेत्रे वा ब्राह्मणगृहस्य निर्माणं अपि कर्तव्यम्। पूर्वादिदिक्षु क्रमानुसारेण देवालयं स्थापयेत्।[50]

ग्रामनिर्माणे गर्भविन्यासः

ग्रामादीनां च सर्वेषां गर्भविन्यासमुच्यते।
सगर्भं सर्वसमत्यै विगर्भं सर्वनाशनम्।
तस्मात् सर्वप्रयत्नेन गर्भं सम्यग्विनिक्षिपेत्।।[51]

सर्वेषां गृह-ग्राम-पुर-नगरादीनां विन्यासे गर्भविन्यासमवश्यमेव करणीयम्। गर्भयुक्तविन्यासः सर्वसम्पत्तिदायकः तथा गर्भहीनविन्यासः सर्वविनाशस्य कारणं भवति। अत एव प्रयत्नपूर्वकं सम्यग्रूपेण गर्भविन्यासं कुर्यात्।

गर्भविन्यासे निक्षेपवस्तूनि

मृत्तिका-कन्द (मूल-जड़)-लौहपात्रस्थितान्न-धातु इन्द्रनीलादिरत्नादिकं गर्भविन्यासस्य द्रव्याणि सन्ति। एतानि द्रव्याणि दोषहीनानि भवेयुः।[52] बृहद्वास्तुमालायामनेन प्रकारेण कथितम्-

मृदिष्टका-स्वर्ण-रत्न-धान्य-शैवालसंयुतम्।
ताम्रपात्रस्थितं सर्वं खातमध्ये नियोजयेत्।।[53]

ग्रामविन्यासे चतुषष्टिपदविभागः कुर्यात्-

यः पुनः स्याच्चतुः षष्ठिपदस्तेन विभाजयेत्।
नरेन्द्राशीविरग्रामखेटादि नगरादि च।।[54]

चतुषष्ठिपदस्य विन्यासः भूपालशिविरस्य स्थापने ग्राम-खेट-पुर-नगरादिविन्यासे च क्रियते। ग्रामनिर्माणे चतुषष्ठिपदस्य विन्यासं कुर्यात्। सूर्यपदे गर्ते जलं पूरयित्वा मृत्तिकां न्यसेत्, तत्पश्चात् अत्रोपरि ताम्रपात्रं विधेयम्। ताम्रपात्रस्य विस्तारः पञ्चधा कथितः। एतेषां प्रमाणं चतुर्दश, द्वादश, दश,

---

50. तत्रैव 9/61-63
51. तत्रैव 9/101-102
52. तत्रैव 9/103
53. बृ. वा. माला श्लो. 143
54. समराङ्गणसूत्रधार 13/5

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अष्ट अथवा चतुरङ्गुलतुल्यं भवेयुः। ताम्रपात्रस्य उच्छ्रेयो विस्तारतुल्यः भवेत्। तत्र पञ्चविंशति अथवा नवकोष्ठकाः भवेयुः। उपपीठपदे (पञ्चविंशतिकोष्ठकताम्रपात्रे) वास्तुदेवानां स्थानं दद्यात्। सूर्यस्य कोष्ठे रजतनिर्मित वृषस्य तथा इन्द्रपदे सुवर्णनिर्मितेद्रस्य मूर्तिं स्थापयेत्।[55]

यमस्य पदे ताम्रनिर्मितयमराजस्य मूर्तिं, वरुणपदे रजतनिर्मितवरुणस्य मूर्तिं स्थापयेत्। सोमपदे श्वेतवर्णस्य (रजतमय) अश्वः तथा रजतनिर्मितगजं स्थापयेत्। ईशपदे पारपं, अग्निपदे त्रपु (टिन), निर्ऋतिपदे सीसं स्थापयेत्। समीरणपदे सुवर्ण, जयन्तपदे सिन्दूरं, भृशपदे हरितालं तथा वितथपदे मनः शिलां (मैनशीक) स्थापयेत्। भृङ्गराजपदे माक्षिकं सुकन्धरपदे जलावर्त शोषपदे गैरिकं (गेरु) तथा मुख्यपदे अञ्जनं स्थापयेत्। अदिति पदे रक्तवर्णस्य ताम्रपात्रं, चतुष्पदे लोकानाथानां अनेन प्रकारेण स्थापयेत् यत्तेषां मुखं आभ्यान्तरं भवेत्।[56] आपवत्सपदे मुक्ता (मोती) सवितापदे पुष्परागं तथा विवस्वानपदे वैडूर्यं स्थापयेत्। इन्द्रजयपदे वज्रं (हिरकं) मित्रकपदे इन्द्रनीलं, रुद्रराजपदे महानीलं, महीधरपदे मरकतं च स्थापयेत्। मध्यमे पात्रस्य मध्ये पद्मरागं विन्यसेद् सर्वाणि रत्नानि धातवश्चैव् स्व-स्त्रस्थाने स्थापयेत्। देवानां स्थानं विधिपूर्वक कृत्वा रत्नानि स्थापयेत्। चतुर्दिक्षु सुवर्णं, आयसं, ताम्रं रौप्यं च स्वस्तिकानि स्थापयेत्।[57]

ब्रह्मस्थानाद् बहिः पूर्वादौ सुवर्णसहितेन शालिं, रुप्येण गेन ब्रीहिं, आयसेन सह कोद्रवं स्थापयेत्। त्रपु (टिन) सहितेन कङ्कं (कंगुनी), सीसेन सह माषं, तिलेन सह वैकृतं (पारा) मुद्गेन सह (मूंग) सहितं आयसं, कुलत्थेन सह ताम्रं स्थापयेत्। प्रथमे बलिं दत्त्वा तत्पश्चात् उपर्युक्तपदार्थान् पात्रे संस्थापयेत्। द्वारस्य दक्षिणभागे पुष्पदन्ते, भल्लाटे, महेन्द्रे एवं गृहक्षतपदे अथवा विष्णुस्थाने (मन्दिरे) लक्ष्मीस्थाने, स्कन्दस्थाने तथा ग्रामस्य रक्षणार्थं तथा सर्वकामाभिवृद्ध्यर्थं गर्भविन्यासः करणीयः। आदौ गर्भविन्यासं कुर्यात् तदा तदुपरि मूर्तिं स्थापयेत्।[58]

विन्यासदोषाः

चाण्डालचर्मकारश्मशानतोयाशयापयानश्च।
देवगृहविश्वकोष्ठग्रामावृतदेशमार्गपरिवृत्तिः॥[59]

यदि चाण्डालचर्मकारयो आवासः, श्मशानस्थानं, जलाशयः, देवालयः, विश्वकोष्ठ, (पदार्थानां संग्रहस्थली) ग्रामं परितः परिवेशः, ग्रामं परितः मार्गः, यथोचितं स्थानं न भवेयुः तदा तस्य परिणामं कष्टकारकं भवति।

55. मयमतम् 9/104,106,107
56. तत्रैव 9/108-113
57. मयमतम् 9/114-117
58. तत्रैव 9/118-126
59. तत्रैव 9/99

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अन्यच्च-

व्यसनं ग्रामविनासो नृपभङ्गो भवति मरणं च।
देवालयान्तरापणशून्यत्वं शोध्यसञ्चयं चापि॥
मार्गेऽशुद्धक्षेपणमीदृग ग्रामस्य शून्यतादायि॥[60]

उपर्युक्तकारणेन ग्रामस्य विनाशं भवति। राज्ञः हानिः (मरणं) भवति। देवालयानां, आपणानां शून्यत्वं शोध्यसञ्चयं (कूड़ासञ्चयं) तथा मार्गे अशुद्धवस्तूनां (कूड़ा आदि) क्षेपणं ग्रामस्य शून्यतां ददाति।

ग्रामेषु प्रासादस्थानानि

वास्तुक्षेत्रस्याभ्यन्तरे देवानां स्थापनं कुर्यात्। ग्रामस्य बाह्ये अथवा आभ्यन्तरे स्वेच्छापूर्वकं शिवालयस्य स्थापनं कुर्यात्। भृङ्गराजे अथवा अग्निपदे विनायकस्य मन्दिरं स्थापयेत्। ईशे, सोमे अथवा अन्यपदेषु शिवमन्दिरं स्थापयेत्।[61] सूर्यपदे सूर्यस्य मन्दिरं, अग्निपदे कालिकायाः मन्दिरं, भृशपदे विष्णुमन्दिरं तथा यमपदे कार्तिकेयमन्दिरं स्थापयेत्। भृशे, मृगे अथवा नैर्ऋत्ये केशवस्य मन्दिरं, सुग्रीवे अथवा पुष्पदन्तस्य पदे गणाध्यक्ष (गणेश) मन्दिरं स्थापयेत्। आर्यकस्य भवनं नैर्ऋत्यकोणे, विष्णोः देवालयं वरुणपदे स्थापयेत्।

वायोः पदे मदिरालयं, मुख्यपदे कात्यायनीमन्दिरं, सोमपदे कुबेरस्य मन्दिरं अथवा मातृदेवानां देवालयं स्थापयेत्। शिवमन्दिरं ईशे, पर्जन्ये अथवा जयन्तपदे स्थापयेत्। कुबेरस्य मन्दिरं सोमे अथवा शोषपदे स्थापयेत्। तत्रैव गणेशस्य मन्दिरमपि स्थापयेत्। अदितिपदे मातृदेवीनां तथा मध्ये विष्णोर्मन्दिरं स्थापयेत् तत्रैव सभामण्डमपि निर्मातव्यम्।[62] सभास्थलं ब्रह्मपदे अथवा ईशाने आग्नेयकोणे वा स्थापयेत्। विष्णुमन्दिरं उत्तर-पश्चिमभागे अथवा दक्षिणभागे निर्मातव्यम्।[63] ग्रामादिविन्यासे शिवस्य स्थानं पूर्वाभिमुखं अथवा पश्चिमाभिमुखं शुभदं भवेत् परन्तु विष्णुस्थानं सर्वदिक्षु शुभं भवति। शेषदेवगणाः पूर्वाभिमुखं, मातृणामुत्तरमुखं, सूर्यमन्दिरस्य द्वारं पश्चिमाभिमुखं निर्मातव्यम्। पुरादिषु देवालयानां निर्माणं गृहनिर्माणात् पूर्वं करणीयम्।

---

60. मयमतम् 9/100
61. तत्रैव 9/57-58
62. तत्रैव 9/67-69, 71-73
63. मयमतम् 9/74
64. तत्रैव 9/75

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दौवारिकः देवताः

ग्रामविन्यासे चण्डेश्वरः, कुमारः, धनदः, काली, पूतना, कालीसुतः, तथा खड्गी इमे सर्वे देवाः दौवारिकाः (द्वारपालाः) कथिताः।[64]

देवालयनिर्माणस्य वर्ज्यस्थानानि

वास्तुमण्डलस्य हृदये वंशस्थाने, शूले, सूत्रे, सन्धिस्थले, कर्णसिरायां च एतेषु षट्स्थानेषु देवालयस्य निर्माणं न करणीयम्।[65]

पुराणेषु ग्रामादिरचना

इतिहासपुराणेषु ग्रामादिविषयकं विवरणं अनेकेषु प्रसङ्गेषु वर्णितं दृश्यते। समराङ्गणसूत्रधार-ग्रन्थस्याध्ययनेनेदं ज्ञायते यत् नगरं, मन्दिरं, दुर्गं, पुष्करं च राज्ञादीनामेवाधीनत्वेन भवति। राजा यत्र निवासं करोति तन्नगरमेव राजधानीति कथ्यते। शाखा नाम नगरम्। कर्वटं नाम नगरसदृशं किञ्चित् विशालं नगरं भवति। कर्वटाद् किञ्चिद् किञ्चिद् ऊनमविकसितं निगम उच्यते। निगमात् किञ्चिद् ऊनमविकसितं ग्रामशब्देनोच्यते। गृहाणां समूहः ग्रामशब्देनोच्यते। यत्र गावः निवसन्ति तत् गोष्ठकम् उच्यते। उपस्थानं भवेद् राज्ञा यत्र तत् पत्तनमिति कथ्यते। यत्र कुटिकां विधाय वासः क्रियते पत्र-शाखा-तृणोपलैः तन्नाम कुटिका। पुलिन्दाः कुर्वते वासं तन्नाम पल्ली इति। नगरं वर्जयित्वा अन्यत् सर्वं जनपदशब्देन बोध्यते। नगरेण समं कृत्स्नं राष्ट्रं देशोऽथ मण्डलं कथ्यते। गृहमेव आवासः सदनं सद्मनिकेतमन्दिरमिति कथ्यते। गृहस्योपरि या भूमिः भवति तन्नाम हर्म्य इति परकीर्तितम्। तस्यारोहणमार्गे सोपानमिति कथ्यते। अनेनेदं स्पष्टं भवति यत् ग्रामशब्दोऽयं पुरनगरयोरेकमविकसितं स्वरूपम्। पुराणेषु पुण्यमयस्य ग्रामत्रयस्योल्लेखः द्रष्टुं शक्यते।

सप्तपुर्यस्त्रयो ग्रामा नवारण्या नवोषशः।
चतुर्दशानि गुह्यानि युक्तिद्वाराणि भूतले।।[66]

पुराणेषु कालग्रामस्य, शालग्रामस्य तथा नन्दिग्रामस्य च महत्त्वपूर्णं स्थानं वर्तते। एनमतिरिच्य हिमालयनिकटे स्थितस्य कलापग्रामस्यापि चर्चा पुराणेषु वर्तते। पुराणेषु सम्भलग्रामस्यापि चर्चा दृश्यते यत्र भगवतः विष्णोः कल्कि-अवतारः भविष्यति। श्रीमद्भागवतस्य व्याख्यायां श्रीधरस्वामिना प्रोक्तं यद् ग्रामाः हट्टादिशून्याः। तत्रः तेन पुर-पत्तन-खेट-खर्वटादीनामपि लक्षणं प्रदत्तम्। खेटाः कर्षकग्रामाः। खर्वटः पर्वतप्रान्तग्रामाः। मार्कण्डेयपुराणे ग्रामस्य लक्षणं द्रष्टुं शक्यते-

---

65. तत्रैव 9/86
66. उद्धृत्य वास्तुशास्त्रविमर्शः पृ. 257
67. मारकण्डेयपुराण अवन्ती क्षेत्रम् 45/3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तथा शुद्धजलं प्राप्या सुसमृद्धं कृषीवला।
क्षेत्रोपभोगभूमध्ये वसतिभूमिसंज्ञिता।।[67]

अनेनेदं स्पष्टं लक्ष्यते यत् पुराणकाले ग्रामेषु शुद्धसंस्कारयुक्ताः जनाः तिष्ठन्तिस्म। ग्रामेषु कृषिः उत्कृष्टा जायते। क्षेत्राणि उर्वरकानि भवन्ति। मार्कण्डेयपुराणे एकस्मिन् स्थले खेटखर्वटादीनामपि निर्देशः कृतः वर्तते। पुराणेषु ग्रामः, जनपदस्य एकं भागं मत्वा देशविभागसम्बन्धितो विचारः अपि क्रियते। अस्य विषयस्य प्रमाणं सहस्यादिखण्डे प्राप्यते यत्र ग्रामसंख्यानुसारेण देशमण्डलादीनां लक्षणं वर्णितं वर्तते।

शतग्रामो भेवेद्देशो देशश्चत्वारि मण्डलम्।
शतमण्डलं भवेत् खण्डम्।।[68]

अत्र देशस्य मूले ग्रामस्य सत्ता स्वीकृता। ग्रामस्य नामकरणविषये एकमसाधारणं तथ्यं मिलति–

यस्मिन् ग्रामे निवासो यो यत् संज्ञश्च वणिग् भवेत्।
तस्य ग्रामस्य तन्नाम ह्यभवत् पृथिवीपते।।[69]

यस्मिन् ग्रामे यः वणिकः अस्ति। वणिकस्य नाम्नः तस्य ग्रामस्य नाम भविष्यति। पुराणेषु मानवसमाजस्य तस्याः अवस्थायाः चित्रणमस्ति। पुरा समाजे ग्रामपुरदुर्गादीनां सुष्ठु व्यवस्था नासीत् वैवस्वतमन्वन्तरे एव पुरग्रामादीनां व्यवस्था अभवत्।

न हि पूर्व विसर्गे वै विषमे पृथिवी तले।
संविभागः पुराणां वा ग्रामाणां वाऽभवत् तदा।।

न शस्यति न गोरक्ष्यं न कृषिर्न वणिक् पथः।
वैवस्वतेऽनन्तरे तस्मिन् साम्प्रतं समुपस्थिते।।

वैन्यात् प्रभृति भो विप्रोः सर्वस्यै तस्य सम्भवः।[70]

खर्वटस्य ग्रामस्य च लक्षणं विष्णुपुराणस्य श्रीधरीटीकायां समुट्टङ्कितं वर्तते–

एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्।
मिश्रं तु खर्वटं नाम नदीगिरे समाश्रयम्।।

68. समराङ्गणसूत्रधारे नगरादिसंज्ञानाम् अ. 18 पृ. 97
69. उद्धृतं वास्तुशास्त्रविमर्शः षष्ठपरिच्छेदः पृ. 258
70. श्रीमद्भागवतम् श्रीधरस्वामी भाष्यम् 4.18.13 उद्धृत च वास्तुविमर्शः षष्टपरिच्छेदः पृ. 258

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च॥[71]

पुराणयुगं नगराणां संरक्षणार्थं ग्रामाः नगरवद् कृताः –

कच्चिन् नगरगुप्तर्थं ग्रामा नगरवत् कृताः।
ग्रामवच्च कृताः प्रान्ताः ते च सर्वे तत्त्वदर्पणाः॥[72]

ग्रामस्य पूर्वे ब्राह्मणाः, दक्षिणे क्षत्रियाः, उत्तरे शूद्राः वासं कुर्युः। ग्रामस्य मध्ये वैश्याः तथा वणिकानां वासव्यवस्था कार्या। ईशानकोणे रङ्गकाराः, कुविन्दः, रजकाः, अग्निकोणे अग्निजीविनः सुवर्णकारलौहकाराणां निवासव्यवस्था कार्या। नैर्ऋत्यकोणे अन्त्यज, चर्मकारः, बुरुडाः, शौण्डिकाः, म्लेच्छादीनां वासव्यवस्था कार्या। व्याधादीनां निवासव्यवस्था वायव्यदिशि कुर्यात्। वापीकूपतडागादीनां पश्चिमे, उत्तरे च विन्यासः कुर्यात्।

ग्रामविन्यासे आयादिगणनाविचारः

आयादि विन्यासे शुभायः ग्रहणीयः। शुभाय हेतु प्रमाणदण्डसम्मतभूखण्डे यदि विसङ्गतिं आगच्छति तदा दण्डप्रमाणं योजनीयं अथवा न्यूनं कुर्यात्। शुभायेव सम्पत्तिकारकं भवति। यथा –

'आयादि सम्पदर्थं वृद्धिहानिं च यष्टिभिः कुर्यात्'[73]

भवननिर्माणाय भूखण्डस्य क्रयणार्थं प्रथमं चिन्तनीयं भवति यत् भूखण्डोऽयं मार्गे स्थितः अस्ति अथवा नास्ति। यस्य चतुष्कोणे युक्तस्य भूखण्डस्य अग्रे चतुर्दिशिपर्यन्तं मार्गाः भवन्ति तद् ब्रह्मस्थलमित्युच्यते। एतस्मिन् स्थले निवसतां जनानां सुखं, स्वास्थ्यं, सम्पत्तिश्च, सदैव वृद्धिकरी भवति।

---

71. उद्धृतं वास्तुविमर्शः षष्टपरिच्छेद पृ. 258
72. मारर्कण्डेयपुराणम् 49.47 उद्धृतं वास्तुविमर्शः पृ. 258
73. मयमतम् 9/18

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मनुष्यालयचन्द्रिका ग्रन्थविमर्शः

श्रीदीपकवशिष्ठः

वास्तुशब्दस्याभिप्रायः निवासोपयुक्तं स्थानं भवति। अयं शब्दः "वस्" निवासे धातोः "तुण्" प्रत्ययेन निष्पन्नो भवति। यत्र निवासो भवति तदैव वास्तु। वास्तोः वास्तुशास्त्रस्य च परम्परा वैदिककालादेवास्ति। ऋग्वेदे अथर्ववेदे च वास्तुशास्त्रस्य स्थापत्यकलायाः वा सम्बद्धाः मन्त्राः संदृश्यन्ते येन तत्कालीनप्रोन्नतशिल्पव्यवस्थायाः दिग्दर्शनं भवति। वेदेषु गृह-दुर्ग-पुर-भवनसम्बद्धसंकेतेन वास्तुविकासस्य प्रोन्नतं ज्ञानं भवति।

वास्तुशास्त्रमत्यन्तं प्राचीनमस्ति। ऋग्वेदेऽस्य विषयकमन्त्राः तत्कालीनप्रोन्नताशिल्पव्यवस्थायाः परिचयं ददति। अथर्ववेदस्य उपवेदत्वेन स्थापत्यवेदः परिगण्यते। तत्र वास्तुशास्त्रे सामान्यजनात् नृपपर्यन्तं सर्वेषां कृते स्थानादिचयनाद्गृहप्रवेशपर्यन्तं वास्तुविषयनियमाः सिद्धान्ताश्च निर्देशिताः सन्ति। तत्र वास्तुशास्त्रस्य मानकग्रन्थेषु एते निबद्धाः सन्ति तेषां विश्वकर्मप्रकाश-मयमतप्रभृतयः ग्रन्थाः प्रमुखाः सन्ति।

अस्मिन् क्रमे एकः महत्वपूर्णः ग्रन्थः "मनुष्यालयचन्द्रिका" अस्ति। अस्य प्रणयनं दक्षिणभारतस्य केरलप्रदेशे राजाश्रये अभवत्। ग्रन्थेऽस्मिन् अधिकांशश्लोकाः मौलिकाः न भूत्वा तन्त्रसमुच्चयतः, मानववास्तुलक्षणतः, देवालयचन्द्रिकातः उद्धृताः सन्ति। "चन्द्रिका" शब्दस्य रचना चन्द्र+ठन्+टाप् इति शब्देन जातास्ति। अस्यार्थः चन्द्रप्रभा, ज्योत्स्ना वा।

शुभलक्षणरहितस्थाने निवासेन सर्वदा अशुभतायाः रुग्णतायाश्च आशङ्का भवति अतः निवासस्थानं सर्वदा शुभं भवेत् यथोक्तम्–

लक्षणहीने धाम्नि वसतामशुभानि सम्भवन्त्येव।
जन्माद्यवसानान्तं मनसा निश्चित्य कारयेत् तस्मात्॥[1]

वास्तुशास्त्रानुसारेण भवनानां प्रासादानाञ्च निर्माणं कथं करणीयम् एवञ्च वास्त्वाधारीकृत्य निर्मिते भवने प्रासादे वा किं वैशिष्ट्यं वर्तते एषां चिन्तनं ग्रन्थेऽस्मिन् वर्तते। केरलादिप्रदेशेषु गतचतुश्शताब्दिकालतः शिल्पाचार्येषु एषः ग्रन्थः लोकप्रियोऽस्ति। ग्रन्थस्यास्य मलयालमभाषायामनुवादः

---

1. मनुष्यालयचन्द्रिका अध्या.-1, श्लो.-15

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अपि शिल्पकाराणां कृते उपादेयोऽस्ति। अतिलघुकलेवरयुक्ते ग्रन्थेऽस्मिन् विशेषरूपेण वास्तुशास्त्रानुसारेण जनानाम् आवासः, भवनं तत्र आवश्यक-सुविधा इत्यादयः विषयाः प्रतिपादिताः। तथ्यानाम् आधारेण प्राप्यते यद् अस्य ग्रन्थस्य प्रणयनं 16 तमशताब्द्यां जातम्।

ग्रन्थोऽयं सप्ताध्यायेषु 246 श्लोकेषु विभज्योपस्थापितोऽस्ति। मुख्यरूपेण ग्रन्थेऽस्मिन् मानवजीवनोपयोगी आवासगृहाणां, गृहोपयोगी कूप-वापि-साधारोर्ध्व-प्रासादानां द्वारमानानाञ्च विस्तृतवर्णनं प्राप्यते। मङ्गलपद्यानामाधारे ग्रन्थोऽयं केरलीय इति स्पष्टं परिलक्ष्यते। यथा–

श्रीमत्कुण्डपुरे विराजति परक्रोडे च तेजः परं
नावानाम्नि च धाम्नि यच्च नितरां मल्लीविहारालये।
अश्वत्थाख्यनिकेतनेऽपि च पुरे श्रीकेरलाधीश्वरे
सम्भूयैतदुरुप्रकाशविषये चित्ते ममोज्जृम्भताम्॥[2]

ग्रन्थकारः स्वेष्टदेवं गुरुञ्च स्मृत्वा ग्रन्थस्य उपस्कारकग्रन्थानां परिचयं दत्वा भूमि-चयनस्य विचारं प्रस्तौति। भूमेः किं लक्षणं, भूमेः कति प्रकाराः, भूमेः परीक्षणस्य कः विधिः, स्थापत्यादीनां कथं वरणम्, किं स्थपतिलक्षणम्, ब्राह्मणादिचातुर्वण्येभ्यः वर्णेभ्यः कीदृशी भूमिः श्रेष्ठा एवञ्च वृक्षाणां कृते शुभाशुभदिग्ज्ञानम् किं इत्यादयः विषयाः ग्रन्थकारेण प्रतिपादिताः। यथा–

पूर्वस्यां वकुलो वटश्च शुभदोऽवाच्यां तथोदुम्बर-
श्चिञ्चा चाम्बुपतौ तु पिप्पलतरुः सप्तच्छदोऽपि स्मृतः।
कौबेर्यां दिशि नागसञ्ज्ञिततरुः प्लक्षश्च संशोभनाः
प्राच्यादौ तु विशेषतः पनसपूगौ केरचूतौ क्रमात्॥

अश्वत्थोऽग्निभयं करोति बहुधा प्लक्षः प्रमादप्रदो
न्यग्रोधः परशस्त्रपातमुदरव्याधिं तथोदुम्बरः।
सम्प्रोक्तप्रतिदिक्स्थितास्त्वपि च ते चान्ये सुवर्णात्मका-
श्छेद्या मन्दिरतस्तरुच्चयुगसीमाभ्यन्तरस्था यदि॥[3]

भूमेः परीक्षणस्य अनन्तरं दिशा-परीक्षणं, वीथीविन्यासः तथा च शङ्कुविधिना दिग्ज्ञानं मुख्यरूपेण परिभाषितं वर्तते। शङ्कुः कथं भवेत्? शङ्कुस्थापनं भूमौ कथं करणीयं, ब्रह्मसूत्रं (पूर्व-पश्चिम रेखा) तथा च यमसूत्रं (याम्योत्तररेखा) कथं निर्धारितं भवेत्, ईशानादिकोणानयनं कथं भवेत्, वीथीविन्यासविचारः, शुभाशुभवीथीनां च (यथा गणेशवीथी-अग्निवीथी-जलवीथी-नागवीथी-यमवीथी-कुबेरवीथी-देववीथी-पिशाचवीथीनां) वर्णनमस्ति। यथा–

---

1. मनुष्यालयचन्द्रिका अध्या.-1, श्लो.-2
2. मनुष्यालयचन्द्रिका अध्या.-1, श्लो.-22-23

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नन्द द्वन्द्वपुटेन वा वृतितया बाह्यादिमध्यान्तिमा
वीथ्यः स्युः परितः पिशाचदिविषद्वित्ताधिभूदण्डिनाम्।
नागाम्ब्वग्निविनायकद्रुहिणनाम्नां चासु निन्द्याः स्मृताः
पैशाचाग्न्यहिदण्डिनां गृहविधौ वीथ्यश्चतुर्दिक्ष्वपि॥[4]

तत्र वास्तुपुरुषोत्पत्तिकथा एवमेव वर्णितास्ति। यथा–

आसीद् दैत्यः प्रदृप्तो निजभुजबलवीर्यादिनाक्रान्तकाष्ठा-
निष्ठो द्वेष्टा सुराणां स तु युधि पतितो विद्धागात्रो धरित्र्याम्।
व्याप्तः सर्वत्र पश्चाद् बहुतरपरिवृत्यैव पृथ्वीं विमथ्नन्
मर्त्या दुःस्था मुनीन्द्रास्त्वपि च मखभुजस्तावदेवं बभूवुः॥

सर्वव्याप्तेऽप्यमुष्मिन्नतनु तनुघटाभ्यन्तरे व्योम यद्वत्
तद्वन्नित्यं विशेषान्नगरपुरमहीक्षेत्रखण्डाङ्गनादौ।
उत्ताने नैर्ऋताशाविनिहितचरणे यावदीशात्तशीर्षे
जाते तावन्निषेदुः स्थिरमिह विबुधास्तस्य देहे क्षणेन॥[5]

ग्रन्थेऽस्मिन् भू-आकारनिर्धारणं, पदविन्यासः, एकाशीतितमे पदे वास्तोः न्यासक्रमचक्रम् देवतान्यासक्रमश्च वर्णितः। शुल्बसूत्रकालादेव यज्ञार्थं वेदिकानिर्माणे अङ्गुलीनां, रज्जोः च प्रयोगः क्रियते स्म। तत्र अङ्गुलादिमानज्ञानार्थं साष्टतिलानां एका 'शिम्बि' कथितः, यस्याः आधारेण यवोदरादिमानानि ज्ञेयानि। अपराजितपृच्छा-वास्तुमण्डनादिग्रन्थेषु "कम्बी" इति शब्दः प्रचलितः अस्ति। यथा–

शिम्बिः साष्ट तिलैर्यवोदरमिति प्राहुस्तदष्टोमिन्मतं
मात्राख्याङ्गुलैरिनमितैः प्रोक्ता वितस्तिस्ततः॥
तद्वन्द्वं करकिष्करत्निभुजदोर्मुष्ट्यादिसञ्ज्ञ तत-
स्त्वेकैकाङ्गुलवृद्धितोङ्गुलविशेषादप्यथो भिद्यते॥[6]

तत्र प्राजापत्यादिहस्तमानम्, यवोदरानुसाराङ्गुलमानस्य त्रिविधाः भेदाः, वर्णभेदात् ग्रामस्य भेदः, देवालयस्य सीमानिर्धारणम्, योनिविचारः, योनिज्ञानार्थं प्रमापणविधिः, आय-व्ययोः विचारः, वर्णानुसारेण हस्तमानप्रयोजनम् इत्यादयः विषयाः निरूपिताः। यथा–

भूसुरकार्ये निलये धनुर्ग्रहं च प्रकीर्णं च।
वैपुल्यधनुर्मुष्टी भूपानां मानसाधने योज्ये॥

1. मनुष्यालयचन्द्रिका अध्या.-2, श्लो.-16
2. मनुष्यालयचन्द्रिका अध्या.-2, श्लो.-27-28
3. मनुष्यालयचन्द्रिका अध्या.-3, श्लो.-1

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

प्राजापत्यं च वैदेहं वैश्यानां सम्मतं भवेत्।
किष्कुः प्राच्यं च शूद्राणां किष्कुः सर्वत्र संमतः॥[7]

योनीनां नामानि एवं च शुभाशुभत्वविचारोऽपि अस्य अध्यायस्य विशेषता वर्तते। यथा–

प्राच्यां केतुर्विधेयः स तु भवति विधानेषु सर्वत्र नित्यं
शालायां दक्षिणस्यां मृगपतिरुदितः केतुयोनिश्च योज्यः।
मातङ्ग केतुसिंहवपि च धनपतौ पश्चिमे स्याद् वृषोऽन्ये
केतुः सिंहो गजश्चापि च निजनिजकोणालयेऽप्येवमेव॥[8]

एवञ्च इष्टविस्ताराधारे शालामानम्, भवनाङ्गमानपरिगणना, लुपानीप्रादीनां प्रमाणम्, देवालयार्थं गुणविस्तारविधिः, विस्तारदैर्घ्यानुपातः, एकद्वित्रिशालचतुःशालभवनस्य वैशिष्ट्यम् चात्र वर्णितं विद्यते। यथा–

एकं स्याद् यदि दक्षिणं गृहमुभे चेत् तच्च पाश्चात्यकं
ते सौम्यं च गृहत्रिके गृहचतुष्के प्राच्यमेतानि च।
वाञ्छन्ति क्वचिदेकमेव भवनं यद्यत्र पाश्चात्यकं
चेष्टं गेहयुगादिनिर्मितिविधौ प्रागुक्तवत् कल्प्यताम्॥[9]

मनुष्यालयचन्द्रिकायाम् अनेन प्रकारेण मानववास्तुलक्षणम्, मत्स्यपुराणम्, राजवल्लभवास्तुशास्त्रम्, बृहत्संहितादिग्रन्थानुसारं शालाविधानं वर्णितं वर्तते। यथा–

सौम्यशालाविहीनं यत् त्रिशालं धान्यकं च तत्॥
क्षेमवृद्धिकरं नृणां तथा बहुपुत्रफलप्रदम्।
शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम्॥
धन्यं यशस्यमानुष्यं शोकमोहविनाशनम्।
शालया याम्यया हीनं यद् विशालं तु शालया॥
कुलक्षयकरं नृणां सर्वव्याधिभयावहम्।
हीनं पश्चिमया यत् तु पक्षघ्नं नाम तत् पुनः।
मित्र बन्धुसुतान् हन्ति तथा सर्वभयावहम्॥[10]

जलनिष्कासनार्थं गृहाधारस्य ऊर्ध्वस्थापनस्य विषये अर्थात् वास्तुकार्ये उच्छ्रायनिर्देशम्, भवने उपपीठस्य आवश्यकतायाः निर्देशः, मल्लीकुट्टिम् (वृक्षारोपणकृते स्थानादिज्ञानम्), पत्रमानम्,

7. मनुष्यालयचन्द्रिका अध्या.-3, श्लो.-5/6
8. मनुष्यालयचन्द्रिका अध्या.-3, श्लो.-30
9. मनुष्यालयचन्द्रिका अध्या.-4, श्लो.-27
10. मत्स्यपुराणम्, 254. श्लो. 4-8

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गृहयोनि-गमनस्य नियमाः, पादुकादीनां प्रमाणम्, अधिष्ठानोपरान्त-स्तम्भप्रमाणानि च इत्यादयः विषयाः अत्र विशेषरूपेण वर्णिताः। यथा–

कृत्वाधिष्ठानमेवं दृढतरमथ तत्छेषितं पादमानं
विद्यादङ्घ्र्युच्चमस्मिन्नृतु तुरग भुजङ्गाङ्क पङ्क्तीश भक्ते।
एकांशेनान्वितं वा विरहितमथवेतीप्सितात्ताङ्घ्रिदीर्घादोमा-
सञ्ज्ञाङ्घ्रिपीठोच्चयमपनयता पोतिकाया घनं च॥[11]

अस्मिन्नेव स्तम्भपीठस्य स्थापनम्, स्तम्भे दण्डमानम्, स्तम्भस्य वृत्तादित्रयविधानपरिकल्पनम्, स्तम्भोपरि पोतिकाख्यस्य मानम्, पोतिका-प्रमाणम्, चूलीलूपयोः विषये कथनम्, कीलस्य स्थित्यादिकं ग्रन्थ निरूपितं वर्तते। यथा–

कीलास्ति कूटसूत्रेष्वखिलनिलयमध्येऽपि च द्वारमध्ये
कर्तव्यास्ते समस्ता यवमितगतिभिः सूत्रतोऽतीतमध्याः।
युक्त्या पङ्क्तिं लुपानां सममपि परिकल्प्याथ मध्ये त तासां कार्याः
कीलास्त्वयुग्माः खलु सकललुपायुग्मसङ्ख्या विधेयाः॥[12]

तुला विन्यासविषये तत्र निगदितम्–

यद्वा कपोतवलभीविलसत्तुलो-
लुपोद्यत्पिधानफलकादितुलाविशेषैः।
युक्तं च खण्डफलकादिविचित्रचित्र-
मूर्तिप्रभेदसहितं महितं विदध्यात्॥[13]

लुपादिविषये विश्वकर्मावास्तुशास्त्रग्रन्थे मानववास्तुलक्षणे, वास्तुविद्यायाञ्च विस्तृतरूपेण विवरणं प्राप्यते। तेषामनुसारेण ग्रन्थेऽस्मिन्नपि कूटलुपादिकानां वर्णनं दृश्यते यथा–

नानाप्रमाणलसितायोजनीया कृयार्हका।
क्षुद्रावरणमानेन क्वचिद्योज्या लुपा मता॥
विमाने शिखरप्रान्ते मण्डपान्तेवराटके।
गोपुरद्वारवलभीप्रान्ते वा पादकान्तके॥[14]

लुपादि-संयोजनम्। यथा–

---

11. मनुष्यालयचन्द्रिका अध्या.-5, श्लो.-21
12. मनुष्यालयचन्द्रिका अध्या.-5, श्लो.-38
13. मनुष्यालयचन्द्रिका अध्या.-5, श्लो.-40
14. विश्वकर्मावास्तुशास्त्रम्, 63, श्लो.8-9

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

आयातचतुरश्रगृहे विकृतिलुपा वंशबद्धकूटगताः।
वंशस्थाग्रास्त्वन्याः प्रकृतिलुपाः कीलिता ह्ययः कीलैः॥[15]

अनेन प्रकारेण मनुष्यालयचन्द्रिकाग्रन्थे वास्तुशास्त्रीयग्रन्थदृष्ट्या प्राचुर्येण मानकवचनानि प्राप्यन्ते। तत्र 'विश्वकर्मावास्तुशास्त्रादिकानां प्राचीनसिद्धान्तानां न केवलमनुरणं दृश्यते अपितु नैकेषु स्थलेषु विशिष्टनियमाः अपि अभिनवदृष्टया सम्प्राप्यन्ते। कथयितुं शक्यते यद्ग्रन्थोऽयं वास्तुशास्त्रीय-सिद्धान्तानां नियमानां वास्तुशास्त्रदृष्ट्या सङ्कलनं कृत्वा मानकग्रन्थरूपे वास्तुशास्त्रस्य ज्ञानागारं समृद्धं करोति। वस्तुतः मनुष्यालयचन्द्रिका वास्तुशास्त्रस्य एकोऽनुपमो ग्रन्थोऽस्तीति।

---

31. मनुष्णलयचन्द्रिका अध्या. - 6, श्लो. - 12

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भूगर्भस्थतलान्वेषणविधिः

श्रीनवीनपाण्डेयः

वेदेषु मानवजीवनस्य कल्याणाय अस्माकम् ऋषिमुनयः प्रतिक्षणं चिन्तनं कृतवन्तः। मानवानां कृते प्रकृतिसंरक्षणविषयकाणां नैकेषां धर्मग्रन्थानां रचना ऋषिभिः कृता। अस्माकं प्रकृतिः मानवमात्रस्य प्रकृतिः नाऽपितु सम्पूर्णजीवजगतः प्रकृतिरस्ति। अस्माकं शरीरस्य रचना पञ्चभौतिकतत्वैः अभवत्। तानि तत्वानि प्रकृतितः प्राप्यन्ते। तेषां नामानि पृथ्वी जलम् अग्निः वायुः आकाशश्च सन्ति। अत्र सर्वाणि तत्वानि स्वस्य-स्वस्य स्थाने पूर्णानि सन्ति। मानवशरीरे सप्ततिप्रतिशतं जलं भवति। अस्माकं भूखण्डे अपि सप्तति प्रतिशतं जलं अस्ति। भूमौ जलस्य ज्ञानविषये यस्य विधेरावश्यकता भवति तस्य नाम दकार्गलमस्ति। भूमिगतजलस्य ज्ञानं दकार्गत्वेनैव भवति। यतोहि प्रयोजनमनुदिश्य मन्दोऽपि न प्रवर्तते इति लौकिकन्यायेन दकार्गलस्य किं प्रयोजनमिति जिज्ञासा समुत्पद्यते। तत्र बृहत्संहितायां दकार्गलस्य विषये विशदचर्चा सम्प्राप्यते। **उक्तं हि - धर्म्यं यशस्यं च वदाम्यतोऽहं दकार्गलं येन जलोपलब्धिः**[1] इति। जलं विना जीवनं दुष्करम्। अतः कूपतडागजलाशयादीनां निर्माणेन धर्मयशः प्राप्तिः भवतीति प्रयोजनम्। विष्णुधर्मोत्तरपुराणे जलप्रशंसायां लिखितं यद् भुवि स्वर्गे च जलं विना जीवनमसम्भवमिति। अतः धर्मात्मना विदुषा पुरुषेण वा अनेकत्र जलाशयाः निर्मातव्याः। कूपनिर्माणफलम् अग्निष्टोमयज्ञफलतुल्यं, मरुस्थले कूपखननेन यत्फलं तत्तु अश्वमेधीयफलतुल्यं भवति। पर्याप्तजल-समृद्धकूपनिर्माणेन सर्वपापनाशो भवति। कूपनिर्माता स्वर्गं सम्प्राप्य सर्वविधं सुखं भुङ्क्ते। स्थानवैलक्षण्येन भोगवैलक्षण्यञ्च भवति। यथोक्तम् -

उदकेन विना वृत्तिर्नास्ति लोकद्वये सदा।
तस्माज्जलाशयाः कार्याः पुरुषेण विपश्चिता॥

अग्निष्टोमसमः कूपः सोऽश्वमेधसमो मरौ।
कूपः प्रवृत्तपानीयःसर्वं हरति दुष्कृतम्॥

कूपकृत्स्वर्गमासाद्य सर्वान् भोगान् समश्नुते।
तत्रापि भोगनैगुण्यं स्थानाभ्यासात् प्रकीर्तितम्॥[2]

धरणितले विद्यमानस्य जलस्य विशेषचिह्नद्वारा ज्ञानमिति दकार्गलशास्त्रस्य प्रयोजनम्। यथा विश्ववल्लभवृक्षायुर्वेदग्रन्थस्य प्रयोजनविषये ग्रन्थकारेण चक्रपाणिमिश्रेण निगदितम् -

1. बृहत्संहितायां दकार्गलाध्यायः श्लो.1
2. विष्णुधर्मोत्तरपुराणे उद्धृतं वृहद्वास्तुमालायां दकार्गलाध्यायः श्लो.1-3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

यावन्मानं जलं वै धरणितलगतं ज्ञायते यैश्च चिह्नैः
यावद्धस्ताभिस्तत्पुनरपि च शिरा यद्दिशातोऽभियाति।

पाषाणाद्यन्तरं यन्मधुरमधुरं शर्क्करा वाप्यधस्तात्।
तत्सर्वं संब्रूवेऽहं सकलजनहितं वीक्ष्य शास्त्राणि शश्वत्।।[3]

येन प्रकारेण पुरुषाणामवयवेषु शिरा नाड्यः प्रोन्नतनिम्नसंस्था अधरोत्तरभावेन, तथा तेन प्रकारेण भूमावप्यधरोत्तरभावेन प्रोन्नता निम्नाः स्थिताः भवन्ति।[4]

तत्रादौ देशविचारः -

जलस्रोतसम्बन्धे साधारणप्रदेशः, अनूपप्रदेशः, जाङ्गलप्रदेशः, पर्वतान्वितस्थानानां विचारो भवति।[5] तत्र आनूपप्रदेशे जलस्य स्थितिः भूमिसन्निकर्षे एव भवति तथा जाङ्गले, मरुस्थले तथा पर्वते स्थाने जलञ्च दूरे भवतीति।[6]

तत्र शिरासंज्ञा -

पूर्वमेव निगदितं यथा येन प्रकारेण मनुष्यशरीरे शिरा नाडयो भवन्ति तथा तेनैव प्रकारेण भूमावप्यधरोत्तरभावेन शिरा भवन्ति। पर्वतात् वृक्षमूलात् वा जलवाहिका निर्झरे तथा जलश्रोते याति एताः सर्वाः जलवाहिका शिरानाम्नाज्ञायन्ते। क्वचित् क्वचित् एताः शिराः कन्दरासु अपि दृश्यन्ते इति।[7] तासां शिराणां संज्ञा अग्रे विविच्यते। इन्द्राद्या देवाः क्रमेण प्राच्याद्यानां दिशां पतयः भवन्ति। तद्यथा इन्द्रः पूर्वस्याधिपतिः, अग्निराग्नेयाधिपतिः, यमो दक्षिणाधिपतिः, निर्ऋति नैर्ऋत्यधिपतिः, वरुणः पश्चिमदिवपतिः, पवनः वायुदिक्पतिः, चन्द्रः उत्तरदिक्पतिः तथा च ईशानकोणस्याधिपतिः रुद्रः कथितः।[8] दिक्पतिसंज्ञया तत्रनाम्नोपलक्षिता शिरा भवति। यथा पूर्वस्यां दिशि या शिरा सा ऐन्द्री, आग्नेयां आग्नेयी, दक्षिणस्यां याम्या, नैर्ऋत्यां निर्ऋती, पश्चिमे वारुणी, वायव्ये वायवी, उत्तरे सौम्या, ऐशान्ये ऐशान्या इति शिरानामानि। एवमष्टासु दिक्ष्वष्टौ शिरा भवन्ति।[9]

---

3. विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.2
4. बृहत्संहिता दकार्गलाध्यायः श्लो.1
5. साधारणानूपाश्चं जाङ्गलान्पर्वतान्वितान्।
   देशनिमित्तजान् ज्ञात्वा वदेत् सर्वं विचक्षणः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.3
6. आनूपे निकटे यथोक्तमतिभिर्नीरं भवेज्जाङ्गले।
   दूरे स्याच्च मरुस्थलेऽश्मनिकरे देशे सशैले पुनः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.4
7. पर्वताद्वृक्षमूलाद्वा शिराधो याति निर्झरे।
   सर्वाः शिराः क्वचित्सिद्धा दृश्यन्ते कन्दरासु च।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.6
8. पुरुहूतानलयनिर्ऋतिवरुणपवनेन्दुशङ्करा देवाः।
   विज्ञातव्याः क्रमशः प्राच्याद्यानां दिशां पतयः।। बृहत्संहिता दकार्गलाध्यायः श्लो.3
9. बृहत्संहिता दकार्गलाध्यायः श्लो.3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

क्र.सं.	दिक्	दिगीशाः	शिरानामानि
1.	पूर्वा	इन्द्रः	ऐन्द्री
2.	आग्नेया	अग्निः	आग्नेयी
3.	दक्षिणा	यमः	याम्या
4.	नैर्ऋत्या	राक्षसः	निर्ऋती
5.	पश्चिमा	वरुणः	वारुणी
6.	वायव्या	वायुः	वायवी
7.	उत्तरा	चन्द्रः	सौम्या
8.	ईशानी	ईशः	ऐशानी

तत्र मध्ये महाशिरानाम्नी नवमी शिरा भवति। आसां सर्वासां दिग्विदिक्स्थानां मध्यभागे नवमी महाशिरा भवति। एताभ्यो नवभ्यो अन्याः शिराः शतशः विनिःसृता प्रख्याताश्च भवन्ति।[10] यथा-

कुमुदा नाम शिरा सा पुरुषत्रयवाहिनी भवतीति।[11]

या शिरा पातालादूर्ध्वं गच्छति सा शुभाः, याश्च शिराश्चतुर्दिक्षु संस्थितास्ताश्चापि शुभाः। कोणादिगुत्था विदिगुत्पन्नाः शिराः न शुभाः।[12] या भूमिः खन्यमाने अतिकठिना तथा पाषाणसन्निभाः सा पर्पटाश्मभूमि नाम्ना प्रसिद्धा भवति। तस्याः अधोभागे बहुजलं भवति।[13]

शिराचिह्ननिर्देशः

जांगलयोगाः - यत्र सर्वदिक्षु जलं न भवेत्, वेतवृक्षाश्च तत्र उद्भूताः तर्हि तत्र करत्रयमितं पश्चिमदिशि क्षितौ सप्तहस्तात्मकं, द्विहस्तात्मकं, सार्धहस्तात्मकम् अधः जलशिरा भवति। प्रथमं स्वर्णिमभा शिला, क्रमशः पश्चात् पर्पटः तत्पश्चात् जलम् भवति।[14] तत्र बृहत्संहितायामपि अस्य

---

10. दिक्पतिसंज्ञा च शिरा नवमी मध्ये महाशिरानाम्नी।
एताभ्योऽन्याः शतशो विनिसृता नामभिः प्रथिताः।। बृहत्संहितायां दकार्गलाध्यायः श्लो.4
11. बृहत्संहितायां दकार्गलाध्यायः श्लो.23
12. पातालादूर्ध्वशिरा शुभा चतुर्दिक्षु संस्थिता याश्च।
कोणादिगुत्था न शुभाः शिरानिमित्तान्यतो वक्ष्ये।। बृहत्संहितायां दकार्गलाध्यायः श्लो.5
13. खन्यमानेऽतिकठिना मृच्चपाषाण सन्निभाः।
पर्पटाश्माभिघात तस्यास्तदधः स्याज्जलं बहु।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.7
14. जलाष्टा यविवर्जिते भवति वेतसोऽदुर्यदा
करत्रयमितौ क्षितौ वरुणदिग्गताघः शिरा।
तदा मुनिकरैः मिता करयुगे तथो सार्द्धके
शिलीकनकसन्निभा तदनु पर्पटस्तोयगः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.8

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वर्णनं मिलति। अम्बुरहिते देशे यत्र स्वभावतः एव जलं न विद्यते, तस्मिन् देशे जाङ्गले यदि वेतसवृक्षो दृश्यते ततस्तस्माद्वेतसवृक्षात् त्रिभिर्हस्तैः पश्चिमयां दिशि खाते सार्धपुरुषमितं सति तोयं वक्तव्यम्। पुरुषशब्देन अत्रोर्ध्वबाहु विंशत्यधिकमङ्गुलशतं पुरुषो ज्ञेयः। ततश्च तस्मिन् खाते पश्चिमा शिरा वहति। तत्र क्रमशः पाण्डुरवर्णः भेकः (मण्डूकः), पश्चात् पीतवर्णा मृत्स्ना, ततस्तस्मिन् खाते पुटभेदकः पाषाणो भवति तदधः तोयं भवति।[15]

अर्जुनवृक्षाज्जलशिराज्ञानम् -

यदि अर्जुनवृक्षादुत्तरे वल्मीको भवति तर्हि तस्माद् अर्जुनाद् वारुण्यां सार्द्धैस्त्रिभिर्पुरुषैः परिमितं अधश्च जलं निश्चितं भवति। तत्र अर्धपुरुषात्मकमधः श्वेता शर्करा, क्रमशः पश्चात् धूसरगोधा, शर्करा, पीतामृत्स्ना तदनु श्वेतमृत्स्ना इति तस्य खातस्य चिह्नानि।[16] बृहत्संहितायामपि अस्य वर्णनमस्ति यथाह -

उदगर्जुनस्य दृश्यो वल्मीको यदि ततोऽर्जुनाद्धस्तैः।
त्रिभिरम्बु भवति पुरुषैस्त्रिभिरर्धसमन्वितैः पश्चात्॥
श्वेता गोधार्धनरे पुरुषे मृद्धूसरा ततः कृष्णा।
पीता सिता ससिकता ततो जलं निर्दिशेदमितम्॥[17]

जम्बूवृक्षाज्जलशिराज्ञानम् -

जम्बूवृक्षस्य समीपे यदि वल्मीको भवति तर्हि वल्मीकात् दक्षिणदिशि सार्धद्विपुरुषाधः सुस्वादु जलं भवति। तत्र कपोताभा मृत्स्ना भवति। तथा वल्मीकस्य पश्चिमे यदि बदरीवृक्षश्च भवति तत्र तस्मात् बदरीवृक्षात् पश्चिमे त्रिपुरुषात्मकमिदमधस्तात् वक्तव्यम्। तत्र द्विकरमितं यदि गोधा मिलति तर्हि जलम् अवश्यमेव लभ्यते।[18] जम्मूवृक्षस्य पूर्वदिशि समीपस्थो यदि वल्मीको भवति,

---

15. यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात्
सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र॥
चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत् पीता।
पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः॥ वृहत्संहितायां दकार्गलाध्यायः श्लो.6-7

16. वल्मीकोऽर्जुन सौम्यगो यदि भवेत् हस्तत्रये चार्जुनात्।
वारुणयां पुरुषैस्त्रिभिः परिमितं सार्द्धं जलं निश्चितम्।
श्वेताभार्द्धनरेषु धूषररुचिर्गोधा ततः शर्करा।
पीता चानु सिता जलस्य निकटे तत्रास्ति सुस्वादु च॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.10

17. बृहत्संहितायां दकार्गलाध्यायः श्लो. 12-13

18. जम्बूवृक्षसमीपगाच्च मधुरं वल्मीकतो दक्षिणे
नीरं स्यात् पुरुषद्वयेऽर्द्ध पुरुषे पारावताभा कृषत्
वल्माकात् बदरी जलेश दिशिचेत्तोयं तदा पश्चिमे
वक्तव्यं पुरुषास्त्रिभिः करयुगे गोधात्विति प्रत्ययः॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.11

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तस्मात् जम्बुवृक्षात् दक्षिणपार्श्वे दक्षिणस्यां दिशि पुरुषद्वये खाते स्वादु जलं भवति। तत्रापि चिह्नानि भवन्ति, अर्धपुरुषे च खाते मत्स्यो दृश्यते ततः पारावातः तत्पश्चात् पाषाणो भवति। तथा चात्र नीलवर्णा मृत्स्ना दृश्यते तत्र दीर्घकाले च प्रभूतं जलं भवतीति बृहत्संहितायाम्।[19]

सिन्धुवारवृक्षाज्जलशिराज्ञानम् -

यदि वल्मीके सिन्धुवारवृक्षः (निर्गुण्डी) भवेत्तर्हि तस्मात् दक्षिणदिशि पुरुषपरिमितं अधस्तात् जलं भवति। तत्र पूर्वे सार्धद्वयं पुरुषप्रमाणात्मकं दूरे कपिलामृत्स्ना तथा शर्करा मिलति। एवञ्च यदि पलाशवृक्षस्य पार्श्वे कोलो (वराहकृतखातः) भवति तर्हि तत्र पलाशवृक्षस्य हस्तत्रयं पश्चिमीदेश सार्धत्रयपुरुषपरिमितमधः क्रमशः श्वेतशर्करा, रक्तशर्करा पश्चाज्जलं भवति।[20] बृहत्संहितायामपि अस्यवर्णनमस्ति परञ्च तत्र चिह्नभेदो भवति। तत्र अर्धपुरुषे खाते रोहितवर्णस्य मत्स्यो भवति। ततो कपिला गौरवर्णा मृत्तिका तदनु शुक्लवर्णः पाण्डुवर्णा बालुका क्रमेण प्राप्यते ततः परतः स्वादुजलं भवति। यथाहि -

वल्मीकोपचितायां निर्गुण्ड्यां दक्षिणेन कथितकरैः।
पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम्॥

रोहितमत्स्योऽर्धनरे मृत् कपिला पाण्डुरा ततः परतः।
सिकता सर्कराऽथ क्रमेण परतो भवत्यम्भः॥[21]

बिल्वोदुम्बरवृक्षाभ्यां जलशिराज्ञानम् -

बिल्वोदुम्बरिके वृक्षे यत्र मिलिते तत्र हस्तत्रयात्मके दूरे दक्षिणस्यां दिशि त्रयपुरुषात्मके अधः नीरं भवति। तत्र सार्धपुरुषमितं खाते दर्दुरः मिलति ततः पश्चात् जलं भवति। यदि कुत्रापि काकोदुम्बरो भवति तस्य समीपे यदि वल्मीको भवति तर्हि तस्याम् पश्चिमदिशि पुरुषत्रयमिते खाते जलं प्राप्यते। बृहत्संहितायामपि अस्य वर्णनं कृतं यद् यत्र विल्वोदुम्बरसंयोगो भवति तस्मिन्

---

19. जम्बुवृक्षस्य प्राग्वल्मीको यदि भवेत् समीपस्थः।
तस्मादक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु॥
अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः।
मृद्भवति चात्र नीला दीर्घ कालं बहु तोयम्॥ बृहत्संहितायां दकार्गलाध्यायः श्लो.9-10

20. वल्मीके यदि सुन्धुवार विटपस्तद् दक्षिणे पुंमिते
तोयं सार्द्धनरद्वयेऽथ कपिला मृच्छर्कराच्छा क्रमात्
कोलश्चेन्मिलितः पलाशतरुणा हस्तत्रये पश्चिमे
स्यात्सार्द्ध त्रिनरेप्यधः क्षितितले श्वेतारुणा शर्करा॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.12

21. बृहत्संहितायां दकार्गलाध्यायः श्लो.14-15

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दक्षिणस्यां दिशि हस्तत्रयं विहाय त्रिभिर्सार्द्धैः पुरुषैरधोऽम्बुजलं भवेत्।[22] बिल्ववृक्षः स यत्र दृश्यते तस्यां समीपे यदि वल्मीको दृश्यते तदा तस्मिन्नेव वल्मीके शिरा भवति सपादे पुरुषत्रये खाते अधः सा शिरा पश्चिमाशिरा भवति। तत्र चिह्नान्यपि कथितानि यथा पाण्डुरा च मृत्तिका प्रथमं भवति, ततो शुक्लवर्णः पाषाणो भवति क्रमशः श्वेतवर्णो मूषकः दृश्यते तत्पश्चात् जलम् भवति।[23]

अश्वत्थवृक्षाज्जलशिराज्ञानम् –

अश्वत्थवृक्षात् पूर्वदिशि अल्पजलदा शिरा भवति। त्रयपुरुषात्मके खाते अधः तत्र क्षारीय तथा लौहसमः मृत्स्ना भवति। तथा यदि कलिवृक्षस्य दक्षिणे वल्मीको भवति तर्हि तस्मात् पश्चिमदिशि पुरुषमिते खाते अधः प्रथमशिरा पश्चात् चतुर्पुरुषे अधः द्वितीया शिरा च भवति।[24]

कपित्थवृक्षाज्जलशिराज्ञानम् –

कपित्थवृक्षात् दक्षिणे तत्र वल्मीको भवेत् तथा वृक्षाधः यदि मण्डूको भवेत्तर्हि प्राच्यां दिशि सप्तकरमितं अथवा उत्तरदिशि सप्तकरमितं दूरे चतुर्भिः पुरुषाधः जलं भवति। तत्र चिह्नानि च एकपुरुषाधः कर्बुरकः सर्पः पश्चात् कृष्णवर्णीया मृत्स्ना क्रमशः पाषाणः, पुटकः तत्पश्चात् सुस्वादुजलस्य शिराद्वयं उत्तरदिशि दृश्येते।[25] यथाह बृहत्संहितायामपि –

याम्येन कपित्थस्याहिसंश्रयदुदग्जलं वाच्यम्।
सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पञ्च॥

---

22. बिल्वोदुम्बरिके यदा च मिलिते हस्तत्रये दक्षिणे
नीरं स्यात्पुरुषत्रयेऽर्द्ध पुरुषे नीचौस्तदा दर्दुरः।
कोकोदुम्बरिका यदास्ति निकटे वल्मीकतः पश्चिमे
तोयं पंत्रितये ततोऽर्ध पुरुषे गौरादृशन्मृत्तथा॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.13

23. बिल्वोदुम्बरयोगे विहाय हस्तत्रयं तु याम्येन।
पुरुषैस्त्रिभिरम्बु भवेत् कृष्णोर्द्धनरे च मण्डूकः॥
काकोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन्।
पुरुषत्रये सपादे पश्चिमदिक्स्था वहति पाषाणः।
पुरुषार्द्धे कुमुदनिभो दृष्टिपथं मूसको याति॥ बृहत्संहितायां दकार्गलाध्यायः श्लो.18–20

24. प्राक् पिप्पलतरोशिराऽल्पजलदा हस्तत्रयेऽधोमता
क्षारालोहसमा च मृत्त्वथशिरा शोणोत्तरे तन्मिता।
वल्मीकः कलिवृक्षतो यमदिशि स्यात् पश्चिमे पुंमिते
तत्पश्चात्सयदा तदार्द्धसहितैः पुंभिः चतुर्भिः शिरा॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.14

25. वल्मीकश्च कपित्थकात् यमदिशि स्याद्दुर्दुरोऽधस्तरो
प्राच्यां सप्तकरेऽप्यथवोत्तरगतं पुंभिश्चतुर्भिर्जलम्।
सर्पः कर्बुरको भवेच्च पुरुषे मृत्स्ना च कृष्णा ततः
पाषाणः पुटकः शिराद्वयमथो सौम्यां जलेनाश्रयः॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.16

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कर्बुरकोऽहिः पुरुषे कृष्णा मृत् पुटभिदपि च पाषाणः।
श्वेता मृत् पश्चिमतः शिरा ततश्चोत्तरा भवति।।[26]

तिलकवृक्षाज्जलशिराज्ञानम् -

वल्मीकस्योत्तरदिशि यदि तिलकवृक्षो भवेत् तत्र दूर्वाः कुशाश्चापि भवेत्तर्हि तस्मात् वृक्षात् पञ्चहस्तमितं दूरे अधः पश्चिमतः पूर्वदिशि गमनशीला जलशिरा च भवति। तथा नारिकेल-तालवृक्षौ यत्र समुपस्थितौ तत्र यदि वल्मीको भवेत्तर्हि पश्चिमदिशि षड्हस्तं वर्जयित्वा अधः चतुर्पुरुषमितं मिष्टं जलं भवति।[27]

अश्मन्तकाज्जलशिराज्ञानम् -

यत्र निर्जले क्षेत्रे अश्मन्तकवृक्षस्य वामे यदि बदरीवृक्षो वल्मीको वा भवति तत्र तस्मात् प्राच्यां दिशि षट्पुरुषकरतो दूरे सार्द्धत्रिपुरुषपरिमितं अधः खाते जलं भवति। तत्र चिह्नान्यपि प्रथमं कूर्मः ततश्च क्रमशः पुरुषपरिमिते धूसरवर्णको पाषाणको तत्पश्चात् याम्यां तु आगता प्रथमा तथा सौम्याऽगता द्वितीया शिरा तत्र द्वे शिरे भवतः।[28]

अन्ययोगश्च -

अश्मन्तकवृक्षस्य वामे उत्तरस्यां दिशि यदि बदरीवृक्षो दृश्यते, अहिनिलयो वल्मीको वा दृश्यते, तदा तस्याश्मन्तकस्येत्तरस्यां दिशि षड्भिः हस्तैः परतः सार्द्धेपुरुषत्रय अधस्तोयं भवति। तत्र चिह्नान्यपि तत्र पुरुषपरिमिते खाते कूर्मो दृश्यते ततः धूसरः पाषाणो दृश्यते तत्पश्चात् श्वेतवर्णा मृत्स्ना दृश्यते। पश्चात् आदौ दक्षिणा शिरा भवति, द्वितीया ऐशान्या शिरा च भवति।[29]

---

26. बृहत्संहितायां दकार्गलाध्यायः श्लो.41-42
27. वल्मीकोत्तरतो यदास्ति तिलकस्तत्रैव दूर्वाः कुशाः
स्निग्धा पञ्चकरैर्मिता त्वथ शिरा तत्पश्चिमे पूर्वगा।
वल्मीको यदि नारिकेलविटपी वा तालवृक्षास्तदा
पश्चात् षट्करतो जलं मधुरं पुंभिश्चतुर्भिर्मितम्।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.17
28. वामेश्मन्तकतो भवेच्च बदरी वल्मीकिका वा यदा
प्राच्यां षटकरतो जलं त्रिपुरुषैः सार्द्धैश्च चिह्नानि चेत्
कूर्मः स्यात् प्रथमे ततश्च पुरुषे पाषाणको धूसरो
याम्यां त्वाद्य शिरापरोत्तरगता तस्याऽधः साक्षया।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.18
29. अश्मन्तकस्य वामे बदरी वा ख्रश्यतेऽहिनिलयो वा।
षड्भिरुदक् तस्य करैः सार्धे पुरुषत्रये तोयम्।।
कूर्मः प्रथमे पुरुषे पाषाणो धूसरः ससिकतामृत्
आदौ च शिरा याम्या पूर्वोत्तरतो द्वितीया च।। बृहत्संहितायां दकार्गलाध्यायः श्लो.43-44

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

हरिद्रावृक्षाज्जलशिराज्ञानम् -

यदि हरिद्रातरोः उत्तरेण यदि वल्मीको दृश्यते तदा हरिद्रातरोः पूर्वस्यां दिशि हस्तत्रयं परतः सत्र्यंशैः पञ्चभिः पुरुषैः सत्र्यंशैस्त्रिभागाधिकैः अधो जलं भवति। तत्र चिह्नानि-प्रथमे पुरुषे खाते नीलो भुजगः दृश्यते पश्चात् पीतमृत्स्ना दृश्यते पश्चात् मरकतोपमो सदृशः पाषाणो दृश्यते ततः कृष्णा भूः तत्पश्चात् आदौ वारुणी शिरा, तथा द्वितीया दक्षिणी च शिरा लभ्यते तत्र।[30] तत्र विश्ववल्लभवृक्षायुर्वेदे चापि अस्य योगो वर्तते यथाह -

हरिद्राद्वामभागे फणि निलयमथो तस्य हस्तत्रये प्राक्।
तोयं स्यात् पञ्चपुंभिः सिततमभुजगपुंमिते पीतमृत्स्ना।।

भूमिः कृष्णा ततो वै वरुणदिशि शिरा तत्पुरो दक्षिणस्याम्।
औषध्यो वा जलं स्यात् तरु तृण लतिका तत्र तोयं समीपे।।[31]

सर्पगृहाज्जलशिराज्ञानम् -

यदि अहिगृहात् दक्षिणे यदि करञ्जवृक्षो भवति तर्हि तस्मिन् दिशि द्विहस्तपरिमिते दूरे च सार्द्धपुरुषाधः क्रमशः कूर्मः पश्चात् अर्द्धपुरुषात्मके अधः धूम्रवर्णा मृत्स्ना तत्पश्चात् अरुणवर्णीयप्रस्तरः ततः जलं भवति तत्र।[32] यदि करञ्जवृक्षस्य दक्षिणस्यां दिशि अहिनिलयः सर्पगृहम् इति च दृश्यते तदा याम्ये करञ्जवृक्षात् हस्तद्वयं त्यक्त्वा अधः सार्द्धे पुरुषत्रितये जलशिरा भवति। तत्र चिह्नानि च पुरुषार्द्धे कच्छपः तत्पश्चात् क्रमशः प्रथमः पूर्वाशिरा दृश्यते पश्चात् ततोऽन्या उत्तरस्यां दिशि द्वितीया च शिरा सुस्वादुजला भवति तस्मात् अधः हरितवर्णा मृत्स्ना भवति तत्पश्चाज्जलं भवति।[33] अन्ययोगश्च अहिगृहस्य विषये बृहत्संहितायां यथाह-

---

30. वामेन हरिद्रातरोर्वल्मीकश्चेज्जलं भवति पूर्वे।
हस्तत्रितये सर्त्यंशैः पुम्भिः पञ्चभिर्भवति।।
नीलो भुजगः पुरुषे मृत् पीता मरकतोपमश्चाश्मा।
कृष्णाभूः प्रथमं वारुणी शिरा दक्षिणेनान्या।। बृहत्संहितायां दकार्गलाध्यायः श्लो.45-46

31. विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.19

32. सद्माहेऽकरञ्जदक्षिणगतं हस्तद्वये दद्दिशि
स्यात्सार्द्धे पुरुषत्रयेऽर्द्ध पुरुषे कूर्मेस्ततो द्वे शिरे।
कौबर्य्यां मधुकात्तदस्ति सलिलं चेदुत्तरे पश्चिमे
सर्पस्तत्र पुमार्द्धके च धरणी धूम्रारुणः प्रस्तरः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.15

33. यद्यहिनिलयो दृश्यो दक्षिणतः संस्थितः करञ्जस्य।
हस्तद्वये तु याम्ये पुरुषत्रितये शिरा सार्द्धे।।
कच्छपकः पुरुषार्द्धे प्रथमं चोद्भिद्यते शिरा पूर्वा।
उदगन्या स्वादुजला हरितोऽश्माधस्ततस्तोयम्।। बृहत्संहितायां दकार्गलाध्यायः श्लो.33-34

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

उत्तरतश्चमधूकादहिनिलयःपश्चिमे तरोस्तोयम्।
परुहृत्यपञ्च हस्तानर्धाष्टमपौरुषान् प्रथमम्॥

अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुलुत्थवर्णोऽश्मा।
माहेन्द्री भवति शिरा वहति सफेनं सदा तोयम्॥[34]

औषधयनुसारेण च योगाः -

जलरहिते क्षेत्रे यदि एतादृशानि जलीयचिह्नानि औषधयश्च यत्र भवन्ति यथा - भार्ङ्गी, दन्ती, रुदन्ती, तृवृत, तमाल, लक्ष्मणा, तथा मालिका आदि औषधयः, तत्र तेषां दक्षिणदिशि त्रिपुरुषाधः परिमितं जलं भवति। अन्ययोगश्च यत्र वृक्षशाखा नम्राः भवन्ति, स्निग्धाः खर्व शाखा च यत्र भवन्ति, सुविकटाः लम्बवृक्षाश्च यत्र भवन्ति तत्र वृक्षाणां शाखा भूमेः नताः यद्यस्ति तर्हि तत्र जलं भवति नतशाखाप्रमाणं अधः जलम् भवति। तत्र बृहत्संहितायामपि अयं योगो वर्ण्यते[35] यथाह -

जलपरिहीने देशे दृश्यन्तेऽनूपजानि चेन्निमित्तानि।
वीरणदूर्वा मृदवश्चयत्र तस्मिन् जलं पुरुषे॥

भार्ङ्गी त्रिवृता दन्तीसूकरपादी च लक्ष्मणा चौव।
नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभिः पुरुषैः॥

स्निग्धाः प्रलम्बशाखा वामनविकटद्रुमाः समीपजलाः।
सुषिरा जर्जरपत्रा रुक्षाश्च जलेन सन्त्यक्ताः॥[36]

भूमिचिह्नानुसारञ्जलशिराज्ञानम् -

यत्र भूमिः गमनकाले गम्भीरशब्दं जनयति तत्र त्रिपुरुषपरिमितमधो जलं भवति। चक्रशीर्षा खर्जूरवृक्षः यत्र भवति तर्हि तत्र त्रिनरपरिमितमधः पश्चिमे जलं भवति।[37] श्वेतपुष्पैः सहितं यदि पलाशवृक्षो कोलवृक्षो वा भवति तदा तत्र वामे जलं द्विहस्तपरिमितं दूरे भवति। परञ्च एतज्जलम्

---

34. बृहत्संहितायां दकार्गलाध्यायः श्लो.35-36
35. भार्ङ्गी दन्ती रुदन्ती तृवृदसितदलो लक्ष्मणा मालिका वा
तत् याम्ये तोयमस्ति त्रिनरपरिमिते स्निग्धपत्रेऽन्यवृक्षे।
नम्रैका यत्र शाखा भवति च तदधस्तत्प्रमाणं जलं वा
स्निग्धा खर्वस्तथा स्यात् सुविकटविटपा लम्ब शाखाश्च यत्र॥ विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.20
36. बृहत्संहितायां दकार्गलाध्यायः श्लो.47-49
37. भूमिः गम्भीरशब्दं जनयति चरणैराहता पुंत्रयात् स्यात्
खर्जूरी चक्रशीर्षा त्रिनरपरिमिते पश्चिमे तत्र तोयम्।
पुष्पैः श्वेतैः पलाशो भवति यदि तदा कर्णिकारोऽथकोल
सव्येहस्तद्वये तत्सुरवसति चमत्कारि नश्येत्रिवर्षात्। विश्ववल्लभवृक्षायुर्वेदः प्रथमोत्सवः श्लो.21

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

त्रिवर्षानन्तरं नष्टो भवतीति। वृहत्संहितायामपि अयं योगो वर्णितः –

नदति मही गम्भीरं यस्मिंश्चरणाहता जलं तस्मिन्।
सार्द्धैस्त्रिभिर्मनुष्यैः कौबेरी तत्र च शिरा स्यात्।।[38]

अन्ययोगाश्च वाष्पधूम्राभ्यां जलशिराज्ञानम् –

यत्र निर्जले क्षेत्रे भूमौ वाष्पं तथा धूम्रो दृश्यते तर्हि तत्र क्षेत्रे पुष्कलं जलं भवति। द्विपुरुषपरिमिते क्षेत्रे तज्जलं भवतीति। तत्र चिह्नान्यपि–पुरुषे परिमितं खाते पाण्डुवर्णीयो जलं दृश्यते।[39]

मरुभूमौ जलशिराविचारः –

मरुभूमौ निर्जलेक्षेत्रे यदि करीरवृक्षस्योत्तरदिशि वल्मीको भवेत्तर्हि करीरवृक्षात् दक्षिणदिशि पञ्चपुरुषाधः जलं भवति। तत्र खाते प्रथमः पीतवर्णस्य भेकः दृश्यते। रोहितकीवृक्षात् त्रयहस्तपश्चाद्यदि सर्पगृहो भवेत्तर्हि तत्र द्विषड्भिः पुंभिः अधः सलवणं जलं भवति।[40] बृहत्संहितायामपि, अस्य योगस्य वर्णनम् अस्ति। यथाह –

उत्तरतश्च करीरस्याहिगृहं दक्षिणे जलं स्वादु।
दशभिः पुरुषैर्ज्ञेयंर्यं पुरुषे पीतोऽत्र मण्डूकः।।[41]

वल्मीकाज्जलशिराज्ञानम् –

यत्र मरुदेशे गौरवर्णीयः वल्मीको भवेत्तत्र पश्चिमस्यां पञ्चपुरुषाधो परिमिते जलशिरा भवति। तत्र चिह्नानि च – पश्चिमदिशि शिलाभूमिः, पुरुषपरिमितं अधः च पीतमृत्स्ना भवति। वल्मीकात् पूर्वदिशि यदि पीलूवृक्षो भवेत् तस्माद् दक्षिणदिशि सप्तपुरुषाधः परिमिते स्वादु जलं भवति। चिह्नानि चात्र–पुरुषपरिमितं अधः श्वेतश्यामवर्णो सर्पो दृश्यते तत्पश्चात् सलवणं जलं भवति।[42]

---

38. बृहत्संहितायां दकार्गलाध्यायः श्लो.54
39. सोष्मो धूम्रो यदि वा स्यात् द्विपुरुषपरिमितस्तत्र वारिप्रवाहो।
भूमेर्नीतचौस्त्वथस्थं द्विनरमिति पयः पाण्डुरूभूय नश्येत्। विश्ववल्लभवृक्षायुर्वेदः प्रथमोत्सवः श्लो.22
39. वल्मीकः सौम्यगश्चेदथ मधुरजलं स्यात् करीराच्च याम्यां
पानीयं पङ्क्तिपुंभिः प्रथमनरमिते पीतवर्णोस्ति भेकः।
रोहितद्रोश्च पश्चादहि गृहमपि चेत् त्रिहस्तात् जलं स्यात
पुंभिः नीरं द्विषड्भिः सलवणमथशिराः पुष्कलाः पश्चिमास्था।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.24
41. बृहत्संहितायां दकार्गलाधयायः श्लो.67
42. वल्मीको गौरवर्णो यदि भवति ततः पश्चिमास्यां समीपे
पंपञ्चाधः शिरा वै शशिदिशि च शिली पंमिते मृच्च पीता।
वल्मीकः पीलु पूर्वो यमदिशिपुरुषात् सप्तपुंभिश्च तोयं
श्वेतश्यामोऽहिराद्ये वहुल सलवणं पुंसि हस्त प्रमाणम्।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.26

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इन्द्रद्रुमाज्जलशिराज्ञानम् –

इन्द्रद्रुमस्य पूर्वदिशि यदि अहिनकुलौ भवेताम् तर्हि तस्मात् पश्चिमदिशि हस्तपरिमितात् पुरुषपरिमिते तत्र गोधा तथा च चतुर्दशपुरुषपरिमिते खाते अधः जलं दृश्यते। कण्टकवृक्षः तथा नीमवृक्षो यदि समक्षमेव मिलतः यत्र तत्र तयोः पश्चिमयोः अष्टादशपरिमिते खाते अधः ईशगाढ्या नाम्नी शिरा च भवति।[43] यथाह बृहत्संहितायामपि –

इन्द्रतरोर्वल्मीकः प्राग्दृश्यः पश्चिमे शिरा हस्ते।
खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे।।[44]

कर्कन्धुपीलूवृक्षाभ्यां जलशिराज्ञानम् –

यदि मरुप्रदेशे कर्कन्धुवृक्षः तथा पीलूना मिलितः तत्र तस्मात् पूर्वदिशि त्रिहस्तपरिमिते दूरे विंशतिपुरुषाधः सलवणं जलम् भवति।।[45]

बिल्वकरीराभ्यां जलशिराज्ञानम् –

बिल्ववृक्षः यदि करीरवृक्षे मिलितो भवेत्तर्हि तस्मात् द्विहस्ताद्दूरे चतुर्विंशतिपरिमिते खाते पुष्कलं नीरं च भवति।[46]

शमीवृक्षाज्जलशिराज्ञानम् –

निर्जले क्षेत्रे मरुप्रदेशे यत्र वल्मीकात् दक्षिणायां दिशि ग्रन्थिभिर्युक्तो शमीवृक्षो भवेत् तत्र तस्मात् वृक्षात् पश्चिमदिशि पञ्चाशत् पुरुषपरिमिते खाते अधः मधुरं जलं भवति। तत्र श्वेतकण्टकैर्युतैः शमीवृक्षात् दक्षिणदिशि अशीतिपुरुषपरिमिते खाते जलं भवति। तत्र अर्धपुरुषपरिमिते सर्पो भवति। यदि सर्पगृहात् समीपे यदि नीमवृक्षो भवेत्तर्हि तत्र पञ्चविंशतिपरिमिते खाते जलं भवति।[47]

---

43. इन्द्रद्रोः पारगहिगृहमतः पश्चिमे हस्तमात्रे
तोयं पुंभिर्दशयुगमितैः पुंमिते गोधिकास्ते।
निःपत्रद्रोर्भवति मिलिता कण्टकारी त्रिहस्ते
वारुण्यां स्यात् धृतिकरमितरीशगाढ्या शिरा चेत्। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.27
44. बृहत्संहितायां दकार्गलाध्यायः श्लो.69
45. कर्कन्धुश्चेति भवति मिलितः पूलुना वै त्रिहस्ते।
प्राच्यां तोयं बहुसलवणं विशतिभ्यश्च पुंभिः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.28
46. बिल्वः स्याच्चेत् ककुभमिलितो वा करीरो द्विहस्तात्
पश्चान्नीरं बहुलमधुरं तत्वसङ्ख्यैश्च पुंभिः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.28
47. वल्मीकाद्दक्षिणस्यां यदि भवति शमी ग्रन्थिभिर्भूरियुक्ता
तद्वारुण्यां शतार्द्धैः जलमिति मधुरं पुंभिराद्यैः प्रदिष्टम्।
श्वेतैः स्यात्कण्टकैः सा यमदिशि पुरुषैर्वारि वाशीति सङ्ख्यैः
सर्पोऽर्द्धे पुंसि नीपोऽहिभवन मिलितः पञ्चविंशैर्नरैस्तत्। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.32

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पृथिव्यामन्यचिह्नैः जलशिराज्ञानम् -

यत्र मरुप्रदेशे यदि पृथिव्यां बहुस्निग्धा मृत्स्ना भवेत्तर्हि तत्र पञ्चविंशतिपुरुषमिते खाते मधुरं सुस्वादु जलं भवति। तत्र त्रिपुरुषान्ते खाते पाण्डुवर्णीया मृत्स्ना वा कृष्णवर्णा मृत्स्ना भवति। महानिम्बस्य वामे भागे सप्ततिपुरुषपरिमिते खाते जलं भवति। तत्र कोमलानि पत्राणि तथा सुमधुरविहगानां निवासो भवति।[48]

तत्र अन्ययोगेभ्यः औषधीभ्यश्च जलशिराज्ञानम् -

मरुदेशे यत्र गुल्मौषधयश्च, नीमवृक्षो शिम्पावृक्षो वा भवेत् तत्र पञ्चदशपुरुषपरिमिते खाते अधः जलं भवति। तत्र नागनिवासोऽपि भवतीति।[49] यदा वल्मीकोपरि दूर्वा कुशा दर्भाश्च पाण्डुरास्सन्ति तदा वल्मीकमूर्धनि मध्ये कूपो देयः। अत्रास्मिन् स्थाने एकविंशति पुरुषैर्परिमिते खाते जलम् भवतीति[50]।

अनुपदेशे जलस्थितिः

अनूपेदेशः बहूदकस्य पर्यायभूतो भवति। तत्र भूमेः समीपे एव बहूदकं भवति। तत्र एतस्य विषये विश्ववल्लभवृक्षायुर्वेदेऽपि[51] प्राहः-

आनूपदेशसमीपवर्ती सुनिश्चितं भूरिजलं च।।[52]

आनूपदेशे यदि औषधयः, जलीयवनस्पतिः, गुल्मवल्लयः, सार्द्राभूः तथा यत्र मशको वीरणं वोलयावाश्च भवेत् तत्र पुरुषपरिमिते खाते जलं भवति। यदि निम्नाभूः भवेत्तर्हि त्रिकरपरिमिते च परिमाणे खाते तत्र जलं भवति।[53]

तत्रानूपे क्षेत्रे जलं बहुसमीपे एव भवति। यत्र दन्ती, रुदन्ती, त्रिवृता, शिवा, माषपर्णी,

48. या सा स्निग्धा बहुभुवि यदा पञ्चविंशैनरैः स्यात
तोयं कृष्णात् त्रिपुरुषमधो मृत्तिका पाण्डुरा वा।
पुंसप्तत्या भवति च महानिम्बतो वामभागे
पानीयं स्यात् मृदुघनदलात् सुस्वरास्तद्विहङ्गाः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.33

49. गुल्मैषध्यः सुहरितदला यत्र वा नीमशिम्पाः।
तत्राम्बुः स्यात् तिथिनरमितं तत्र सर्प्पोऽथदेवः।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.34

50. वल्मीकमूर्धनि यदा दूर्वा च कुशाश्च पाणिडुराः सन्ति।
कूपो मध्ये देयो जलमत्र नीरैकत्रिंशत्या।। बृहत्संहितायां दकार्गलाध्यायः श्लो.77

51. तदनूपे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः।
एतैरेव निमित्तैर्मरुदेशे सप्तभिः कथमेत्। बृहत्संहितायां दकार्गलाध्यायः श्लो.89

52. विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.39

53. देशेऽनूपे हरितजलजा औषधि गुल्मवल्यो
भूमिः सार्द्रामशकसहिता वीरणं वोलयावा।
तोयं तत्र प्रचुरमधुरं पुंमितेऽधः स्थितं स्यात्
निम्नाभूर्वा त्रिकरपिरमितं तत्र तोयं प्रदिष्टम्।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.35

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गरुडवेगा, ज्योतिष्मती, व्याघ्रपदी तथा वाराही वनस्पतयः यत्र स्थिताः तदनूपे प्रदेशे बहुसमीपे भूमौ जलं भवतीति।[54]

साधारणदेशे जलस्थितिः -

साधारणदेशे सर्वत्र एव जलं भवति इति प्राचीनविद्वद्भिः ऋषिभिश्च प्रोक्तम्। निकटस्थचिह्नेषु दशहस्तपूर्वे तु प्रभूतं जलं भवतीति।[55]

पर्वतीयदेशे जलस्थितिः-

पर्वतीयक्षेत्रेषु तस्य देशस्य स्थितिं परिमाणञ्च दृष्ट्वा विचक्षणः जलसम्बन्धे जलस्थितिं वदेत् इति।[56] पर्वतीयक्षेत्रे बोधिवृक्षः, उदुम्बरवृक्षः, पलाशवृक्षः, तथा न्यग्रोधश्च यत्र मिलन्ति तत्र त्रिपुरुषपरिमिते खाते भूरि जलं भवति। एतद् पर्वतीयक्षेत्रेषु जाङ्गले योगः।[57] तथाह च बृहत्संहितायां-

न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः।
वटपिप्पलसमवाये तद्वद्वाच्यं शिरा चोदक्।।[58]

तत्र भूमिगुणानुसारेण जलस्थितिः -

प्राचीनोक्त्यानुसारेण यस्य स्थानस्य संज्ञा निर्झरेणैव भवेत् तत्पर्वते पाषाणसन्धौ द्रुममूलतः च तत्र जलसिद्धिरेव भवति।[59]

अनूपदेशे त्वथ पर्वतीये शिरोद्भिः भूरिजला च दृष्टा।
तीर्थेऽन्यदेशेऽपि च देवताग्रे भूमेरधस्तात् क्वचिदूर्ध्वगामी।।[60]

शिलाविचारे जलनिर्णयः -

पूर्वदिशि उन्मुखः उदुम्बरसमाभा, अञ्जनाभा, वैडूर्यसमाभा, पलालसमा धूम्रवर्णीयाभा तथा कपिलवर्णीयाभा युक्ता शिला यदि भवेत् तत्र समीपे बहुजलं भवति इति।[61] अनेन प्रकारेण जलज्ञानं विधाय तत्र जलप्राप्त्ययर्थं कूपादिकं कार्यमिति।

---

54. दन्ती रुदन्ती तृवृता शिवा वा स्यामाषपर्णी गरुडाशुवेगा।
ज्योतिष्मती व्याघ्रपदी वराही यत्रास्ति तत्राम्बु समीपवर्ती।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.36
55. विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.40
56. विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.41
57. बोधिद्रुमोदुम्बरिकापलाश न्यग्रोधयोगश्च मिथो यदि स्यात्
पुंभिस्त्रिभिस्तत्र जलं च तेषां मधःस्तले जाङ्गलके च भूरि।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.43
58. बृहत्संहितायां दकार्गलाध्यायः श्लो.96
59. उक्ता पुरा निर्झरसंज्ञका या देशे भवेत्सा खलु पर्वतीये।
पाषाणसन्धे द्रुममूलतो वा सिद्ध्यैव निर्याति न तत्र मानम्।। वश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.48
60. विश्ववल्लभवृक्षायुर्वेदः प्रथमोत्सवः श्लो.49
61. प्रागुन्मुखोदुम्बरभाञ्जनाभा वैडूर्यकावत् द्युतिमौक्तिकाच्छा।
पलालधूम्राकपिला शिला या तस्याः समीपे बहुतोयमस्ति।। विश्ववल्लभवृक्षायुर्वेदः प्रथमोल्लासः श्लो.50

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वनस्पतीमहत्त्वम्

डॉ. रामबाबूपाण्डेयः

वनस्य पतिः वनस्पतिः। अत्र पारस्करादित्वात् सुडागमे वनस्पतिरिति। संस्कृतसाहित्ये वनस्पितिजगतो वर्णनं विविधरूपेण प्राप्यते। वनस्पतिशब्देन सामान्यरूपेण वृक्ष एव गृह्यते स्म। पश्चात्तु वृक्षवीरुधवनस्पत्योषधिश्च मध्ये अन्तरं स्थापितम्। वृक्ष शब्दस्तु वृक्षार्थे एव रूढः सञ्जातः। फलपक्वान्ते ये वीरुधावनस्पतयः शुष्यन्ति ते ओषधयः कथ्यन्ते। पुष्पोद्गमविनैव फलोत्पादकवृक्षा वनस्पति-कोट्यां परिगण्यन्ते, वट-अश्वत्थ-प्रभृतयः। उक्तं च मनुस्मृतौ-'विना पुष्पं फलिद्रुमः'[1] अपि च 'अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः'[2] वृक्षमात्रम् इति। नन्दीवृक्षोऽश्वत्थभेदः प्ररोहो गजपादपः। स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः[3]। इति। घृतपृष्ठस्य पुत्रविशेषे भागवते यथा- आत्मा मधुरुहो मेघपृष्ठः सुधमा भ्राजिष्ठो लोहितवर्णो वनस्पतिरिति घृतपृष्ठसुधाः[4]। वटवृक्षः तत्पर्य्यायो यथा- 'वटो रक्तफलः शृङ्गी न्यग्रोधाः स्कन्धाजो ध्रुवः। क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः।।' इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे कथिमस्ति।

श्रीमद्भगवद्गीतायां कथिमस्ति यत्- सम्पूर्ण भौतिकं जगत् अव्यक्तपरमेश्वरस्य योगमायया उत्पद्यते। ईश्वरः सर्वमभिव्याप्य तिष्ठति। तं विना ब्रह्माण्डस्य किमपि वस्तु स्थातुं न शक्नोति- **'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्'**[5] भवन्तु मानवाः, सागराः, गिरयः, नद्यः, वनानि, वनस्पतयः, अन्यानि च सकलानि भौतिकवस्तूनि वा सर्वत्र भगवत एवैश्वर्य विलसति। जनानां सुखसमृद्ध्यर्थं वनस्पतीनाम् अस्तित्वं सुतरां महत्त्वपूर्णमस्ति। मानवस्य आर्थिकप्रगतौ, सामाजिकविकासे, सांस्कृतिकेऽभ्युदये, औषधिविज्ञानसमुन्नतौ च वनस्पतीनां योगदानं सर्वथा उल्लेखनीयमास्ते। मानवानामपि वनस्पतीनां विकासे संरक्षणे च महत्त्वपूर्ण योगदानंविद्यते। वेदशास्त्रार्थतत्त्वदृष्टारो ऋषयः सर्वप्रथमं वनस्पतीनां यथार्थज्ञानं प्राप्तवन्तः। गृहस्थानां, तपस्वीनां, गुरुकुलानां, चिन्तकानां, पशुपक्षिणां, शुद्धवातावरणस्य च कृते वनस्पतयः महोपयोगिनः सन्ति। वनस्पतीनां सर्वाणि अङ्गानि परोपकारार्थम्- पुष्पाणि, फलानि, काष्ठानि सर्वाण्यपि अवयवानि परोपकाराय एव, तेषां किमपि वस्तु स्वार्थाय नहि।

---

1. मनु. 1/47
2. मेदिनी-216
3. भावप्रकाशे -1.1
4. भा. पु. 5.20.21
5. श्रीमद्भ.गीता10.39

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अत एव साधु कथितम्- **'परोपकाराय फलन्ति वृक्षाः'** । वृक्षाः सर्वेषां प्राणिनां कृते जीवनप्रदातारो भवन्ति। अतस्तेषां जीवनं सर्वोत्कृष्टं भवति। ते महीरूहाः धन्याः सन्ति येषां पार्श्वात् कोऽपि जनो निराशो न याति-

अहो एषां वरं जन्म सर्व प्राण्युपजीवनम्।
धन्या महीरुहा येभ्यो निराशां यान्ति नार्थिनः॥

वृक्षाः स्वपुष्पैः फलैः छायाभिः मूलैः वल्कलैः काष्ठैः गन्धैः निर्यासैः भस्मभिः अङ्गारैः शाखाभिश्च सर्वेषां कल्याणं कुर्वन्ति-

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
गन्धनिर्यासभस्माथितोक्मैः कामान् वितन्वते॥[6]

वृक्षाः न केवलं पुष्पैः फलैः काष्ठादिभिश्च विश्वं समृद्धं कुर्वन्ति, अपितु प्राणदायकवायुना पर्यावरणमपि शुद्धं कुर्वन्ति। वादरायणश्रीकृष्णद्वैपायनेन पर्यावरणसंतुलनाय वनानां महत्त्वमित्थं प्रतिपादितं महाभारतस्य उद्योगपर्वणि-

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रः छिद्यते वनम्।
तस्माद् व्याघ्रो वनं रक्षेद् वनं व्याघ्रं च पालयेत्॥[7]

स्वसुखनिरभिलाषः वनस्पतिः लोकहितार्थं प्रतिदिनं कष्टं सहते, मूर्ध्ना तीव्रमातपमनुभवति परन्तु सर्वदा संश्रितानां जनानां छायां कुर्वन्ति- उक्तञ्च **'छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे'**। पर्यावरणस्य परिष्कारार्थं वृक्षाः अहर्निशं कार्यं कुर्वन्ति। चाणक्यनीतिदर्पणे प्रतिपादितं यत् एकेनैव सुवृक्षेणसुगन्धिना सम्पूर्णं वनं पर्यावरणं च सुवासितं भवति यथा एकैनैव सुपुत्रेण सम्पूर्णकुलं संसारे कीर्तिं प्राप्नोति-

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्व सुपुत्रेण कुलं यथा॥[8]

कतिपयपादपाः धार्मिकदृष्ट्या विशेषरूपेण महत्वपूर्णाः सन्ति। 'वृक्षायुर्वेदे' प्रतिपादितमस्ति यत् यो नरः एकम् अश्वत्थम्, एकं न्यग्रोधं, दश चिञ्चिणीं, त्रयं कपित्थबिल्वामलकं पञ्चाम्रवृक्षान् चारोपयति स कदापि नरकं न याति-

अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिनीकम्।
कपित्थबिल्वामलकत्रयञ्च पञ्चाम्ररोपी नरकं न पश्येत्॥[9]

---

6. भा.पु. 10.22.34
7 म. भा. उद्योगपर्वणि 29/55
8 चाणक्यनीतिदर्पणे 3/14
9 वृक्षायुर्वेदे 23

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

यत्र च सपुष्पफला वृक्षा उच्छिद्यन्ते तत्र प्रकृतिः रुष्टा भवति। तत्र अतिवृष्टिः अनावृष्टिः दुर्भिक्षं च प्रादुर्भवति येन तत्रस्था जनाः बहुविधक्लेशं प्राप्नुवन्ति। अतः वृक्षाः कदापि नहि विच्छेद्याः। पत्रपुष्पफलदायिवृक्षाणां का कथा, महाकविकालिदासस्तु व्यवहरति यत् विषवृक्षोऽपि कदापि न छेदनीयः -**'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्'**[10] वराहपुराणे इदं तथ्यं स्थापितमस्ति यत् यः नगरोपवने स्थितान् वृक्षान् छिनत्ति सः जृम्भणं नाम नरकं प्रति गच्छति। वृक्षजातीनां छेदनं तु साक्षाद् नरकमेव - **छेदनं वृक्षजातीनां द्वितीयं नरकं स्मृतम्**[11] अतः वृक्षाः कदापि नहि विच्छेद्याः।

वृक्षाः सर्वथासंरक्षणीयाः। फलोत्पादकवृक्षाणां छेदनं दण्डनीयोऽपराधोऽस्ति इत्यपि कविभिः निवेदिताः। अस्माकं शास्त्रेषु वनस्पतिलोकेन सह कथं व्यवहर्त्तव्यमित्येतत्सम्बन्धे प्रचुरनिर्देशाः प्रदत्ताः सन्ति। सामान्यतया सर्वे पादपाः समानरूपेण आदरणीयाः संस्कृतवाङ्मयस्य अवगाहनेन इदं स्पष्टमस्ति यत् वृक्षाः प्राचीनकालादेव देवता इव पूजिता आसन्। यजुर्वेदे ऋषिणा वृक्षाणां वनानां औषधीनां वनस्पतीनां नमस्कारः कृतो विद्यते, येषु वृक्षेषु सूर्यस्य अशुद्धिं हरणशीलानि किरणानि प्रवेशं कुर्वन्ति। तेषां च वृक्षाणां वनानां संरक्षकान् प्रत्यपि नमनं कृतं तत्र, अनया भावनया ऋषीणां पर्यावरणं प्रति सद्भावना प्रदर्शिता वर्तते। सा वस्तुतः प्रशंसनीया अस्ति। यथा-

नमो वृक्षेभ्यो हरिकेशेभ्यो वनानां पतये नमः
वृक्षाणां पतये नमः औषधीनां पतये नमः।
वृक्षाणां पतये नमः अरण्यानां पतये नमः॥[12]

वस्तुतः वनस्पतीनां, वनानाम्, औषधीनां संरक्षकाः पालकाः संवर्द्धकाः अनेन कारणेन नमस्कारयोग्याः सम्मानयोग्याश्च सन्ति वैदिकानाम् ऋषीणां दृष्टौ, यतोहि तैः सर्वैः प्राणिनामाधारभूतानां पोषकतत्त्वानां च संरक्षणकृतमस्ति।

एतैः वृक्षैः वनस्पतिभिश्च प्राप्तेन आहारेण खलु अस्य संसारस्य पोषणं भवति, सर्वे प्राणिनः स्वस्थाः भूत्वा संसारस्य सर्वेषु कार्येषु प्रवृत्ताः भवन्ति। एतादृश्याः कृतज्ञतायाः भावना अथर्ववेदेऽपि प्रकृतिं प्रति उल्लिखितमस्ति। यथा-

तिस्रो दिवस्त्रिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक्।
त्वयाहं सर्वाभूतानि पश्यानि देव्योषधे॥[13]

वैदिकानाम् ऋषीणां विशेषतः अथर्ववेदीयानां ऋषीणाम् औषधीं प्रति अतीव सायुज्यमासीत्। ते खलु तेषामौषधीनां महत्त्वं जानन्ति स्म। तेषां च गुणेभ्योऽपि सम्यक्तया परिचिता आसन्, अनेनैव

---

10 कुमारसंभवम् 2/55
11 वराहपुराणे 61/2
12 यजु. १६/१७-२०
13 अथर्व.4.20.2

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तैः वनसम्पदां प्रति वेदेषु स्थले-स्थले कृतज्ञता प्रदर्शिताः। तैः एतदपि कथितमस्ति यत् एतेषां वनवृक्षादिकानां संपोषणस्य ज्ञानं सर्वेषां कर्तव्यमस्ति। एताः खलु सर्वाः औषध्यः अस्माकमपि वचनान् श्रृणवन्तु। अथर्ववेदे अस्य भावाभिव्यक्तिः सम्यक्-तया संजाता यथा -

यश्चाहं वेदवीरुधो याश्च पश्यामि चक्षुषा
अज्ञाता जनीमश्च या यासु विद्म च समभृतम्।
सर्वाः समग्राः औषधीर्बोधन्तु वचसो मन
यथेमं पारयामासि पुरुषं दुरितादधि॥[14]

तपस्विनामाश्रमस्थेषु वनस्पतिषु अद्भुद्चमत्काराः प्राप्यन्ते। अभिज्ञानशाकुन्लस्य चतुर्थेऽङ्के महर्षेः काश्यपस्याश्रमे विभिन्नवनस्पतीनां विस्मयकारिणो व्यवहाराः सादरम् उल्लेखनीयाः सन्ति। शकुन्तलायाः प्रस्थानकाले तस्याः मण्डनार्थं वनदेवैः वनस्पतिभिश्च बहुमूल्यानि माङ्गल्यानि विविधानि आभूषणानि क्षौमवस्त्राणि लाक्षारसप्रभृतिवस्तूनि सहर्ष प्रदत्तानि। यथा-

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविस्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥[15]

अनेन ज्ञायते यत् तपोवने तरवः सम्यक् संरक्ष्यन्ते। स्वप्नवासवदत्ते आदिनाटककारः भासो व्यवहरति-**'वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः'**[16] एतेन वर्णनेन स्पष्टमिदं यत् संस्कृतसाहित्ये वनस्पतीनां भूयिष्ठं जीवनदर्शनं निरूपितमस्ति। अद्यापि सर्वे जनाः यदि तथैव वृक्षान् प्रति भावना धारयेयुः तर्हि सर्वेषां जीवनं सुखदायकं भवेत्।

वनस्पतयः औषधिगुणसम्पन्ना भवन्ति। अस्माकम् आदिकाव्ये वाल्मीकिरामायणे तथ्यमिद स्फुटं निरूपितमस्ति। युद्धकाण्डे यदा लक्ष्मणः शत्रुवाणेन मृतकल्पः सञ्जातः। तदा सुषेणः बलिष्ठं हनुमन्तम् औषधिमानयनार्थमुवाच-

सौम्य शीघ्रमितो गत्वा पर्वतं हि महोदयम्।
पूर्वं तु कथितो योऽसौ बीरजाम्बवता तव॥
दक्षिणे शिखरे जातां महौषधिमिहानय।
विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा॥

---

14. अथर्व. 8.7.18-19
15. अभिज्ञानशाकुन्तलम् 4.5
16. स्वप्नवासवदत्तम् 1/21

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सञ्जीवकरणीं वीर सन्धानीं च महौषधिम्।
सञ्जीवनार्थं वीरस्य लक्ष्मणस्य त्वमानय॥[17]

बलिष्ठः हनुमान् सपर्वतमौषधिमानीतवान्। सुषेणः त्वरितमेव लक्ष्मणं तदौषध्या विरुजं विशल्यं च चकार।

वृक्षायुर्वेदानुसारं वृक्षाणां महत्त्वं प्रयोजनानि च - यथा अश्वत्थः- अश्वत्थवृक्षस्य रसः कषायःभवति। अयं गुरुगुणयुक्तः, रूक्षः वीर्यशीतः च। अयम् अवत्थः आकारस्य कारणात् वृक्षजातौ अन्तर्भवति तथैव औषधीयत्वस्य कारणात् औषधीयानां सस्यानां गणेऽपि अन्तर्भवति। अश्वत्थस्य फलानां खादनेन मलबद्धता निवार्यते। जीर्णक्रिया चापि वर्धते। अस्य त्वचः चूर्णं व्रणस्य उपरि लेपयति चेत् व्रणः अपगच्छति। अस्य चूर्णं, वटवृक्षस्य चूर्णं, 'बसरि' इत्यस्य वृक्षस्य चूर्णं, औदुम्बरवृक्षस्य चूर्णं, 'हूवरि' वृक्षस्य चूर्णं च योजयित्वा जलं योजयित्वा सम्यक् क्वथनीयम्। इदं कषायं 'पञ्चवल्कलकषायम्' इति उच्यते। इदं कषायं मुखे संस्थाप्य गण्डूषकरणेन मुखस्य पिटिकाः अपगच्छन्ति। महिलानां श्वेतस्रावः अस्ति चेत् गर्भाशयस्य प्रक्षालनार्थम् अपि इदं कषायम् उपयोक्तुं शक्यते। अस्य काण्डस्य दारूणि बहूपयोगाय न भवन्ति। केवलम् इन्धनत्वेन उपयोक्तुं शक्यते। सजीववृक्षस्य कश्चन निर्यासः स्रवति। एषः सुवर्णाभरणनिर्माणार्थं भवति। पञ्चाग्नि वृक्षेणु अयं अन्यतमः। अस्य वृक्षस्य शाखानां सपत्रः परभागः समिद्रूपेण यज्ञादिषु उपयुज्यते। अस्य मूलस्य त्वक् आयुवेदीयौषधिनिर्माणे उपयुज्यते। अयं श्लोकः वृक्षस्य गरिमां सूचयति- **'अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिनीकम्।**[18] इत्यादि।

निम्बवृक्षस्य रसः तिक्तः, अस्य त्वक्, निर्यासः, पर्णं, पुष्पं, पल्लवं, फलं, बीजस्य तैलं, रसः च औषधित्वेन उपयुज्यते। यद्यपि निम्बः अत्यन्तं तिक्तः तथापि संजीवनी इव। पुस्तकानां मध्येऽपि अस्य पर्णानि स्थाप्यन्ते। तेन पुस्तकानि कीटैः न खाद्यन्ते। मषकाणां निवारणाय अस्य काष्ठैः पर्णैः वा धूमः उत्पाद्यते। निम्बवृक्षस्य कटुता दाहहन्त्री चापि उक्तञ्च-

निम्ब! त्वदीयकटुता यदि दाहहन्त्री गायन्तु मूढमनुजास्तव दोषगाथाः।
तप्तास्त एव तपनोपमपित्ततापैः गास्यन्ति मित्रवर! तावकगीतिकानि॥[19]

हे! निम्ब यदि त्वदीय कटुता दाहहन्त्री मूढजनाः तव दोषगाथा गायन्तु। मित्रवर! ते एव तपनोपमपित्ततापैः तप्ताः तावकगीतिकानि गास्यन्ति। अतः निम्बः संजीवनी इवैव।

वटवृक्षः अत्यन्तः विशालः वृक्षः, तस्मात् सः वृक्षगणे अन्तर्भवति। औषधीयानां गुणानां सस्यानां गणे अपि अन्तर्भवति। अस्य रसः कटुः तथा कषायः। अयं रूक्षः, शीतगुणयुक्तः च। अस्य

17. श्रीमद्वा. रा. युद्धकाण्डे 101.30-33
18. वृक्षायुर्वेद 23
19. तत्रैव

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

रसः कण्ठवेदनां, व्रणं, गुल्फछेदनं, दन्तवेदनां, दन्तपल्याः वेदनां च निवारयति। अस्य त्वचा निर्मितं चूर्णं जले संयोज्य निर्मितं कषायं मधुमेहरोगिणां हितकरम्। अस्य वृक्षस्य पर्णस्य उपरि तैलं लेपयित्वा तद् उष्णीकृत्य पिटकानामुपरि स्थापनेन पिटिकाः बहुशीघ्रं अपगच्छन्ति। अस्य वृक्षस्य फलं वृष्यत्वेन अपि उपयुज्यते। पादपानां लोकोत्तरं माहात्म्यं विचार्य गुरुमिव तान् नमस्करोति पण्डितराजजगन्नाथः। स लिखति-

धत्ते भरं कुसुमपत्रफलावलीनां, धर्मव्यथां वहति शीतभवां रुजं च।
यो सर्वमर्पयति चान्यसुखस्य हेतोः तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।[20]

अस्मिन् विषये इत्येव निवेद्यते यत् संस्कृतसाहित्ये वनस्पतिविषये यत् किमपि वर्णितं तन्न ज्ञातुं शक्यते वैयाकरणैः। औषधिविशेषज्ञाः एव अस्मिन् विषये ज्ञातुं समर्थाः सन्तीति।

20. भामिनीविलास-वन्यरत्ने

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दिनमान

पं. देवनारायण झा

''दिन दिनेशस्य यतोऽत्र दर्शने तमी-तमो हन्तुरदर्शने सति।'' इस गोलीय वचन प्रमाण से क्षितिज से ऊपर सूर्य रहने पर दिन और क्षितिज से नीचे सूर्य रहने पर रात्रि होती है। अर्थात् पृथ्वी का जो भाग सूर्य बिम्ब के सामने पड़ता है। वह दिन कहलाता है और जो भाग सूर्य के प्रकाश से ओझल रहता है वह रात्रि होती है। पृथ्वी अपनी धुरी पर प्राय: 24 घंटे में एक बार चक्कर लगा लेती है। यह 24 घंटे का दिन-रात्रि का मान औसत है। काल के अनेक मान हैं। इनमें नौ मान प्रसिद्ध हैं।

ब्रह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥[1]

ब्राह्मम्- ब्रह्मसम्बन्धी, दिव्य- देव सम्बन्धी, पित्र्य- पतृसम्बन्धी, प्राजापत्यम्- मनु सम्बन्धी, गौरवम्- बृहस्पतिसम्बन्धी, सौर- रवि सम्बन्धी, सावनम्- भू सम्बन्धी, चान्द्रम्- चन्द्रसम्बन्धी, आक्षम्- नक्षत्र सम्बन्धी मान है।

उपर्युक्त नव मानों में भी मानव जीवन में चार प्रकार के मान का ही व्यवहार होता है। जैसे-भास्कराचार्य ने कहा है-

वर्षायनर्तुयुगपूर्वकमत्र सौरान् मासास्तथा च तिथयस्तुहिनांशुमानात्।
यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत् सावनाच्च घटिकादिकमार्क्षमानात्।।[2]

वर्ष, अयन, युगादि सौर मान से मास, तिथि का विचार चान्द्र मान से व्रत उपवास, चिकित्सा, सूतक, वासरादि सावन से, घटिकादि का ज्ञान नाक्षत्र मान से होता है। परन्तु पाश्चात्य देशों में केवल मान सावन को भी व्यवहार में लाते हैं। **सौरमान- रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव।**[3] 360^0 का भगण होता है। इसमें मेषादि 12 राशियां होती हैं। जब

---

1. सूर्यसिद्धान्त मानाध्याय श्लोक 1
2. सि.शि.म.का. श्लो. 31
3. सि.शि. म. कालमानाध्याय श्लो. 19

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सूर्य अपनी प्राक् गति से 1 वर्ष में सम्पूर्ण 12 राशियों का भ्रमण करता है तो उसे सौर वर्ष कहते हैं। 360^0 में 12 से भाग देने पर 30^0 का एक सौर मास होता है। एक सौर मास को 30 से भाग देने पर 1^0 मान का एक सौर दिन होता है। सौर दिन में 60 सौर घटिका होती है। एक सौर घटिका को 60 से विभक्त करने पर एक सौर विघटिका होती है।

दैव-मान-एक सौर वर्ष देवताओं और दैत्यों का एक अहोरात्र होता है। किन्तु देवताओं का जो दिन होता है। वही राक्षसों की रात होती है। इस तरह 360 सौर वर्ष देवताओं का एक वर्ष होता है। यही-दैव-मान होता है।

चान्द्रमान-''रवीन्दोर्युते संयुतिर्यावदन्या विधोर्मासः।'' ''दर्शः सूर्येन्दुसंगम'' अर्थात् अमान्त में ही सूर्य एवं चन्द्रमा का योग होता है। उसके बाद चन्द्रमा अपनी शीघ्र गति से जब वह प्रथम योग बिन्दु में आता है। तब उसका एक भगण पूरा हो जाता है। सूर्य अपनी गति से आगे रहता है। जब चन्द्रमा पुनः सूर्य के साथ होता है तब दूसरा दर्शान्त होता है। प्रथम दर्शान्त से दूसरे दर्शान्त तक के समय को चान्द्रमास कहते हैं। एक चान्द्रमास में 30 तिथियां होती हैं। अतः एक तिथि में 12^0 होते हैं।

नाक्षत्रमान -नक्षत्रों के प्रवहवायु से पश्चिमाभिमुख भ्रमण से एक उदय से दूसरे उदय पर्यन्त के समय को दिन कहते हैं। **''भवासरस्तु भभ्रमः''**[4] अर्थात् भभ्रम ही नाक्षत्र दिन कहलाता है।

सावन दिन - ''इनोदय द्वयान्तरं तर्कसावनं दिनम्''[5] दो सूर्योदय के अन्तर की अवधि को सावन दिन कहते हैं। इसे ही कुदिन भी कहते हैं।

पैत्रम् -चान्द्रमास ही पितरों का एक अहोरात्र होता है।

कल्पना कीजिए की सूर्योदय समय में ही रवि व चन्द्र मेष राशि के प्रारम्भ में स्थित हों, तब एक साथ ही सौर, सावन, चान्द्र, नाक्षत्र दिनों की प्रवृत्ति होगी। उसके बाद प्रवह गति से पश्चिमाभिमुख जाता हुआ सूर्य जब पुनः उदय क्षितिज में आयेगा तब **'इनोदयद्वयान्तरं तदर्कसावनं दिनम्'** इस परिभाषा से एक सावन दिन की पूर्ति होगी। नाक्षत्र दिन पुनः मेषारम्भ के उदयक्षितिज में आने पर ही पूर्ण हो जाता है। वहाँ सूर्य के पूर्वाभिमुख एक अंश चलने पर एक सौर दिन हो जायेगा। एक सावन दिन में मध्यम रविगति 59 / 8' मध्यम चन्द्र गति 790' / 35" दोनों का अन्तर 731' / 27" इसमें 720^0 से भाग देने पर 1'/0'/57" से प्राप्त होता है इसी मध्यममान से चान्द्र दिन की पूर्ति हो जाती है। सौर, चान्द्र, नाक्षत्र दिनों के स्वरूपावलोकन से ज्ञात होता है कि

4. सि.शि. कालमानाध्याय 19
5. तत्रैव 19

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इन सभी का कब आदि और कब अन्त होता है इसका प्रत्यक्ष दर्शन नहीं होता है। गणित के द्वारा ही इनका साधन किया जाता है। परन्तु सावन दिन का अवलोकन प्रत्यक्ष होता है। इसीलिए प्राचीन और अर्वाचीन सभी आचार्यों ने अर्क सावन दिन को ही ग्रहादि साधन एवं व्रतादि के लिए उपयोग में लाया है।

नाडी वृत्त से दक्षिण एवं उत्तर सूर्य जितना झुका हुआ रहता है वह क्रान्ति कहलाती है। 90^0 में क्रान्ति को घटाने पर उसका द्युज्या चापांश होता है। ध्रुव स्थान से स्व-स्व द्युज्या चापांश से रचित स्व-स्व अहोरात्र वृत्त ही दिन एवं रात्रि के न्यूनाधिक (बड़ा, छोटा) होने का कारण बनता है। परमोत्तर क्रांति में परम दिन होगा और परम दक्षिण कान्ति में परम रात्रि होगी।

क्षितिज वृत्त के ऊपर अहोरात्र वृत्त का जो खण्ड होता है। वह दिन का मान होता है और क्षितिज वृत्त से नीचे अहोरात्र वृत्त का मान रात्रिमान होता है। निरक्षश में क्षितिज वृत्त और उन्मण्डल वृत्त दोनों एक ही होते हैं। उन्मण्डल वृत्त, नाडी वृत्त को समद्विभाग करता है। इसलिए वहाँ दिन-रात्रि का मान बराबर होता है। अर्थात् 30-30 घटी का दिन एवं रात्रि का मान होता है। अन्यत्र भूपृष्ठस्थ का, अक्षांश, क्रान्ति आदि के द्वारा दिनमान एवं रात्रिमान का ज्ञान होता है। वहाँ विषुवद्दिन को छोड़कर दिन-रात्रि का मान बराबर नहीं होता है।

निरक्ष देश से 66 अक्षांश के अन्तराल में स्थित प्रदेशों का स्व-स्व क्षितिजवृत्त, स्व-स्व अहोरात्र वृत्त को समद्विभाग नहीं करता है। क्योंकि उनका क्षितिजवृत्त, उन्मण्डल वृत्त से भिन्न होता है। अतः वहाँ उन्मण्डल वृत्त, स्वक्षितिजवृत्त दोनों के मध्य में अहारात्रवृत्त में चरखण्ड-काल होता है और उन्मण्डल, याम्योत्तर का अन्तर मान 15 घटिका होती है। उस चरखण्ड काल को सौम्य गोल में उन्मण्डल से नीचे क्षितिज रहने के कारण 15 घटी में चर खण्डकाल जोड़ने से और याम्यगोल में उन्मण्डल से उपर क्षितिज रहने के कारण 15 घंटी में चरखण्डकाल घटाने से दिनार्ध मान होता है। दिनार्ध को 30 में घटाने पर रात्र्यर्ध होता है। दिनार्थ को द्विगुणित करने पर दिनमान होता है और रात्र्यर्ध को द्विगुणित करने पर रात्रिमान होता है। इसीलिए दिन-रात्रि की व्यवस्था के लिए आचार्य भास्कर ने कहा है–

चरघटीसहिता रहिताः क्रमात्तिथिमिता घटिकाः खलु-गोलयोः।
भवति तद् द्युलं निजसावनं खगुणतः पतितं रजनीदलम्।।[6]

90^0 में परमक्रान्ति घटाने से अर्थात् 66 पलांश स्थान में जब मिथुनान्त में सूर्य आता है तब वहाँ उसके अहोरात्र वृत्त के क्षितिज के साथ बिन्दुमात्र समागम होने से 60 घटी का दिनमान

6. सि.शि. कालमानाध्याय 20

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

होता है। उसके बाद जैसे-जैसे पलांश की वृद्धि हागी वैसे-वैसे दिनमान भी बढ़ेगा। इसी तरह वृषान्त द्युज्याचापांश तुल्य पलांश में मिथुन कर्क के वहाँ के क्षितिज को उर्ध्व रहने से वहाँ स्थित सूर्य सदा दिखता है। इसीलिए वहाँ दो मास के बराबर दिन होता है। मेष क्रान्ति को 90^0 में घटाने से जो मान होगा उसके बराबर अक्षांश देश में चार मास के बराबर दिन होता है। वहाँ वृष, मिथुन, कर्क, सिंह हमेशा उदित दिखते हैं। जहाँ 90^0 के बराबर पलांश होता है। वहाँ सायन मेष से सायन तुलादिपर्यन्त 6 राशि को क्षितिज से ऊपर रहने के कारण वहाँ स्थित सूर्य बराबर दिखता है। इसलिए वहाँ 6 मास के बराबर दिनमान होता है।

90^0 का पलांश सुमेरु और कुमेरु पर होता है। सुमेरु पर देवताओं का वास है और कुमेरु पर दैत्यों का वास है। दोनों का अन्तर 180^0 पर है। इसलिए वहाँ दोनों का दिन, रात विपरीत होता है। अर्थात् नाड़ी वृत्त से उत्तर जब तक रवि घूमता है तब तक देवताओं का दिन होता है और दैत्यों की रात्रि होती है। नाड़ी वृत्त से दक्षिण सूर्य के भ्रमण से दैत्यों का दिन होता है और देवताओं की रात्रि होती है। दोनों का क्षितिजवृत्त नाड़ी मण्डल ही है। सायन तुलादि में दैत्यों का दिन होता है और देवताओं की रात्रि होती है।

अब गर्भक्षितिजस्थित किसी बिन्दु से भूबिम्ब स्पर्श रेखा करें। वह रेखा ऊर्ध्वाधर सूत्र में जहाँ लगता है। वहीं यदि दृष्टि स्थान की कल्पना करते हैं तब वहाँ स्थित द्रष्टा गर्भ क्षितिज स्थित सूर्य बिम्ब को देखेगा एवं उपर्युक्त दृष्टि स्थान से जैसे-जैसे दृष्टि स्थान ऊपर होगा वैसे-वैसे गर्भक्षितिज से नीचे भाग में सूर्य बिम्ब दिखेगा।

भू-पृष्ठोर्ध्ववासियों के ध्रुव से नीचे स्थितवालों के स्वगर्भीय नाडयाख्य भुज से नीचे दृश्यांशवश से जो दृक् स्थान ध्रुव सूत्र ऊर्ध्वाधर सूत्र में गिरेगा। उस स्थान पर द्रष्टा के दिन रात्रि मान एवं दृश्यांश भू पृष्ठवासियों का दिन-रात्रि मान की व्यवस्था इस प्रकार से होगी। गर्भ क्षितिज से नीचे जितना अंश दिखाई देता है वह दृश्यांश होता है। दृश्यांशवश से कमलाकर ने सिद्धान्त तत्त्व विवेक में द्रष्टा के दृष्टि उच्चछ्राय मान का वर्णन अच्छी तरह से किया है।

एक राशि अपमांश तुल्य दृश्यांश में दृष्टि उच्छ्रायगत द्रष्टा के मीनादि से तुला तक भ्रमण करते हुए रवि के अनुसार आठ मास का दिनमान होता है और अवशिष्ट चार मास रात्रि मान होता है। इसी तरह 2, 3 राशि अपमांश तुल्य दृश्यांश में भी जानना चाहिए। जिस प्रकार उत्तर ध्रुव से विचार करते हैं। उसी तरह दक्षिण ध्रुव से भी विचार किया जाता है। इससे अधिक अपमांश तुल्य दृश्यांश सिद्ध उच्छ्राय स्थित दृष्टि को सूर्य का दर्शन सर्वदा होता है।

नाड़ी वृत्त से उभय दिशा में जिनांश तुल्य परमान्तरित होने से सूर्य के जिनांशाक्ष प्रदेश में और उससे अल्पाक्ष प्रदेश में भी अधोखरवस्तिक में सूर्य के जाने से वहाँ भू पृष्ठोर्ध्वदृष्टि दृश्यांश

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वश से सदा उसका अवलोकन असंभव है। अधोनिरक्षदेश से स्वाध खस्वस्तिक तो अक्षांशतुल्य अन्तरित है। वहाँ यदि अक्षांश = 24^0 + कुच्छन्न कला। अधोनिरक्ष खस्वस्तिक से उत्तर सूर्य के परमगमन प्रान्त से-भूविम्ब स्पर्श रखेगा तो उस ऊर्ध्वाधर खस्वस्तिक गत रेखा के समानान्तर होगा। अतः दोनों के योग के अभाव होने से ऊर्ध्वाधर सूत्र में वैसा बिन्दु नहीं है जहाँ दृष्टा के जाने के बाद सदा सूर्य रहे।

जहाँ अक्षांश > 24^0 + कुच्छन्न कला, वहाँ परम रवि के गमन से अधः खस्वस्तिक कुच्छन्न कलाधिक अन्तरित है। वहाँ परम रवि गमन प्रान्त से भूविम्व स्पर्श रेखा अवश्य ऊर्ध्वाधर पर सूत्र में मिलती हैं। असमानान्तर होने से वहाँ योगबिन्दुगत द्रष्टा सर्वदा रवि दर्शन करेगा।

पूर्वोक्त जो दृक् चिह्न है उससे अत्यन्त अधिक ऊपर ब्रह्म का निवास स्थान है। तो क्यों नहीं ब्रह्मा का सदा दिन होगा। भास्कराचार्य ने सिद्धांत शिरोमणि में कहा है-

''यदतिदूरगतो द्रुहिणः क्षितेः सततमाप्रलयं रविमीक्षते।''[7]

